In Public domain. Digitization Muthulakshmi Research Academy

(91) T. 1059
148 148
L. No. 154 a.

Sivāgamādimāhātmyam

॥ शिवागमादिमाहात्म्यम् ॥

नमो . . . . बिन्दवे शाश्वताय च ।
गुरवे च गणेशा . . . . ॥

केचिन्निरीश्वरवादिनां मतमवलम्ब्य स्मृतीनामकृतकत्वेन प्रामाण्यं शिवागमानां कृतकत्वेन प्रामाण्यं नास्ति यद्यस्त्यपि कथञ्चि . . . . श्रुतिपथगलितानां मानुषाणामिति दुर्बुद्धयो . . . . . . ।

. . . . . भूत्वा पञ्चभिस्तैर्मुखैरपि ।
वेदादिग्रन्थजालं यत् तत्सर्वमवदत् प्रभुः ॥
अदृष्टविग्रहाच्छान्तात् शिवात्परमकारणात् ।
नादरूपं विनिष्क्रान्तं . . . सर्वमिति स्थितमिति ॥

पौष्करशिवागमश्रुतेश्च ।

पुनरङ्गानि . . . . . मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वं चेत्यनुक्रमात्
अस्त्रशास्त्रं परं तस्मात् विद्या ह्यष्टादश स्मृताः ।
अष्टादशानां विद्यानामेतासां भिन्नवर्त्मनाम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः ।
अष्टादश पुराणानि कथितानि समासतः ॥
तेषां सर्गान्तरेष्वेव द्वापरे दर्शको मुनिः ।
व्यासो यथा महादेवः कामिकादिप्रकाशकः ॥
अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
कामिकादिप्रभेदस्य यथा देवो महेश्वरः ॥

इति वायव्यसंहिता धर्मसंहिता सूतसंहिता श्रुतिभिश्च यथा कामिकादीनां शिवेनैव प्रणयनात् । प्रामाण्ये यथापि नारायणावतारेण व्यासेन प्रणयनात् प्रामाण्येऽपि असावव-शिष्ट इति सूतसंहिताप्रतिवचनाच्च । वेदानां शिवाग-मानां च परमाप्तपरशिवकृतकत्वेनैव प्रामाण्यम् । नाकृतकत्वेन । कालिदासादिवाक्यवद्वर्णपदवाक्यरचना-वत्वात् । सत्कार्यतया वेदाः नित्या इति चेच्छिवागमा-श्च । नासतो विद्यते भावो नाभावो विद्यते सत इति वचनात् । तथेत्यभिव्यक्तिकर्तृत्वं शिवस्य सिद्धमि-त्यकृतकत्वं वाऽस्तु ।

तदुक्तं सूतसंहितायां -

वेदोऽनादिः शिवस्तस्य व्यञ्जकः परमार्थतः ।
अभिव्यक्तिमपेक्ष्यैव प्रणेतेत्युच्यते बुधैरिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

तथा सहस्रनामव्याख्यायां कृतागमायेत्यत्र कृता: प्रणीता आगमा: कारणकामिकाद्यास्तन्त्रविशेषा येन स: कृतागमस्तथा चोक्त: -

कामिकाद्या वातुलान्ता: शिवेनोक्ता: शिवागमा इत्यलङ्कारदीक्षितेन व्याख्यातम् । ततः शिवकृतकत्वेनैवोभयो: प्रामाण्यम् । तदुक्तं चतुर्वेदार्थतात्पर्यसंग्रहे -

वेदा: प्रमाणमिति संगिरमाण इव
दिव्यं तवागममवैति जन: ~~प्रमा~~ प्राणम् (प्रमाणम्) ।
त्वद्ध्यानवाक्यविषयौपयि(मे)कै: पदार्थै- .
.. कलितविग्रहमाच मूलात् ॥
कल्पा: प्रमाणमृषिभिर्यदि न: प्रणीता:
किं न: प्रमाणमृषिणां महतां महर्षे
शक्यं न वक्तुं परिगृह्य दूषितानि ॥
तन्त्रान्तराणि भवता शिवकर्तृमन्तीति ॥

वायव्यसंहितायां च -

अज्ञानाशेषदोषेण सर्वज्ञेन शिवेन . ।
.. णीतममलं वाक्यं तत् प्रमाणं न संशय: ॥
तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता ।
यथार्थे पुण्यपापेषु तदश्रद्धो व्रजत्यध इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

ततः परस्परं वेदानामिव परस्परोपबृंहणत्वमन्तरा स्वतन्त्रत्वेनैवोभयेषां प्रामाण्यं। तदुक्तं मतङ्गे —

प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम्। इति। पौष्करेऽपि -

प्रमाणमेकं तद्वाक्यं तथ्यं श्रेयोनिधेः सदेति।

तथा व्याख्यातं सूतसंहितायां विद्यारण्यस्वामिभिरपि शिवपूजाप्रक्रमे —

वैदिकी तान्त्रिकी चे. द्विजेन्द्रास्तान्त्रिकी तु सा।
तान्त्रिकस्यैव नान्यस्य वैदिकी वैदिकस्य हीति॥

अत्र वेदतन्मूलस्मृतिपुराणादिप्रतिपादितप्रकारा वैदिकी। तदनपेक्षशिवप्रोक्तकामिकाद्यागमप्रतिपादितप्रकारा तान्त्रिकी। तत्र तान्त्रिक्या अधिकारिविशेषमाह। तान्त्रिकस्यैवेति। तन्त्रोदितकुण्डमण्डलादिपुरस्सर-दीक्षादिसंस्कृतस्यैवेत्यर्थ इति। तथा हि।

न हि परस्परं वेदानामिव स्वतन्त्रप्रयुक्तशिवा-गमानां वेदबाह्यत्वम्। वेदसारमिदं तन्त्रमिति वेदोत्कृष्टवेदविशेषत्व.. समुक्तत्वात्। तदुक्तं शैवपुराणसंभववायव्यसंहितायां —

भगवञ्छ्रोतुमिच्छामः शिवेन परिभाषितम्।

In Public domain. Digitization Muthulakshmi Research Academy

(तानां)

वेदसारं शिवज्ञानं संश्रुतां विमुक्तय इति।

मकुटे च -

वेदसारमिदं तन्त्रं तस्माद्वैदिक आचरेत्।
वेदान्तार्थमयं ज्ञानं सिद्धान्तं परमं शुभम्॥
ऊर्ध्वस्रोतोद्भवं श्रेष्ठमष्टाविंशतितन्त्रकम्।
वेदसारार्थदं ज्ञेयमन्यत्त्वन्यार्थसाधनमिति॥

सुप्रभेदे -

शैवं पाशुपतं सोमं लाकुलं च चतुर्विधम्।
तेषु शैवं परं सौम्यं रौद्रं पाशुपतादिकम्॥
कामिकाद्यष्टविंशच्च तन्त्रं शैवमिति स्मृतम्।
तदेव सौम्यमाख्यातं सिद्धान्तं हि तदेव तु॥
तदन्यद्रौद्रमाख्यातं तन्त्रं पाशुपतादिकमिति।

कामिके च -

सिद्धान्तं वेदसारत्वादन्यद्वेदबहिष्कृतम्।
सिद्धान्ते विहिताचारो वैदिकाचार उच्यते॥
कर्तव्यं चेदनुष्ठेयं शैवकर्माविरोधि यत्।
विरुद्धं चेत् परित्याज्यं न तु शैवं परित्यजेत्॥
संग्राह्यं वैदिकं सर्वं शैववाक्याविरोधि यत्।
शैवं वैदिकमेवोक्तं वैदिकं शैवमेव च॥

In Public domain. Digitization Muthulakshmi Research Academy

वैदिकान्तर्बहिर्भूतं शैवं शैवास्तदप्यधः ।
तथापि वैदिकाच्छ्रेष्ठं शैवं तस्मात् परं नहि ॥
सिद्धान्तं कामिकादि स्यात् नास्मात्परमनुत्तमम् ।
शैवं तु मूलभूतं स्यात् चतुर्वेदास्तदुद्भवाः ॥
तथापि वैदिकं वेदसारमित्यादिवाक्यतः ।
शैवं प्रोक्तं च सर्वत्र तदर्थैक्यान्मुनीश्वरा इति ॥

ननु वेदसारं श्रौतमस्वतन्त्रं तन्त्रमन्यत् । पुनरवेदसार-मश्रौतं कामिकादिकं स्वतन्त्रं तन्त्रमन्यत् ।
तदुक्तं वायव्यसंहितायां —

शैवागमोऽपि द्विविधः श्रौताश्रौतश्च संस्मृतः ।
श्रुतिसारमयश्रौत स्वतन्त्र इतरो मतः ॥
स्वतन्त्रो दशधा पूर्वं तथाष्टादशधा पुनः ।
कामिकादिसमाख्याभिः सिद्धः सिद्धान्तसंज्ञितः ॥
श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः ।
परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यत इति ॥

तदेवं स्थिते कथं कामिकादिकं वेदसारमिति मकुटा-
154 b दिषूक्तम् । सत्यम् । श्रौतत्वापादकं वेदसारत्वं द्विप्रकारम् । तत्र प्रथमं शैवपाशुपतप्रतीततन्त्रावैदिक-पाशुपतप्रमेयप्रविस्तारकशतकोटिप्रविस्तरे कस्मिंश्चि-

In Public domain. Digitization Muthulakshmi Research Academy

इत्य यावदष्टसिद्धा स्वतन्त्रं तत्र दृष्टं वेदसारत्वं वेदा-
नुसारित्वम् । द्वितीयसिद्धान्तप्रमेयप्रविस्तारकपदा-
र्थादिप्रविस्तरे स्वतन्त्रतन्त्रे कामिकादिके दृष्टम् ।
वेदसारत्वं तु न हि दध्यादेर्नवनीतादिवद्वेदादुत्पन्नत्वं
वेदानुसारित्वं वेदव्याप्यत्वं वा । अन्यच्च किञ्चिदु-
क्तमपि । वेदानुसारित्वं वेदार्थस्वीकारत्वमित्यर्थः ।
तत्त्वेन वेदव्यापकत्वात् । तदुक्तं वायव्यसंहितायां-

यदुक्तमन्यथाशास्त्रेषु विद्यते तच्छिवागमे ।
न दृष्टं यच्छिवज्ञाने तदन्यत्र न विद्यत इति ॥

कामिके च-

सिद्धान्तात् परमं ज्ञानं नेति शास्त्रस्य निश्चयः ।
अन्यथाशास्त्रेषु ॥
अष्टाविंशतितन्त्राणि सिद्धान्तमिति कीर्तितमिति ।

चिन्त्यविश्वे च —

शैवं पाशुपतं ज्ञेयं सर्वतत्त्वैकनायकम् ।
सर्वमन्त्रमयं ज्ञेयं सर्वदेवमयं भवेत् ॥
जन्मान्तरतपोभिश्च सन्मार्गज्ञानसंभवमिति ।

अरुणाचलमाहात्म्ये च -

नास्ति शोणाद्रितः क्षेत्रं नास्ति पञ्चाक्षरान्मनुः ।
नास्ति माहेश्वराद्धर्मो नास्ति शास्त्रं शिवागमादिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

किं तु प्रमाणविरोधस्य स्वतः प्रमेयविरोधमूलत्वात् ।
परस्परं वेदानामिव कथञ्चित् क्वचित्किञ्चिदेकात्म-
वादादिप्रमेयप्रदेशप्रतिपादनप्रकारविरोधमात्रपरित्यागेन
वेदविहितविधिनिषेधकत्ववैधुर्येण बहुशोऽर्थैक्या-
दविरोधवेदाचारवेदार्थस्वीकारेण शैववेदविशारदा-
निति सुप्रभेदकृते स्वातन्त्र्येण वेदाधिगतानधिगतार्थ-
गन्तृत्वलक्षणवेदजनकवेदविशेषशिवागमनामाशिव-
वेदत्वमेव वेदसारत्वमिति पर्यवसितार्थः । (मनुष्यजनकमनुष्यत्वविशेषब्राह्मणत्ववत् ।)

तदुक्तं मोक्षकारिकासु —

पाशदृष्टिविरोधाय प्रवृत्तमपि मानताम् ।
न जहाति यतश्श्रेयां पाशास्तस्येह सर्वतः ॥
न च स्वगोचरे तासां बाधते तत्प्रमाणताम् ।
तासु वर्णाश्रमाचारा न ह्यनुज्ञानवच्च तत् ॥
न चान्येन प्रमाणेन संरुद्धस्तस्य गोचर इति ।
विशेषैरपि च कर्तव्यं पत्युं प्रेरणपूर्वकमिति च ।

मोहशूरोत्तरे च —

पुराणं साध्यते वेदैरागमैश्च तदुक्तयः ।
सामान्यं च विशेषं च शैवं वैशेषिकं वच इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

वृद्धाचलमाहात्म्ये च —

शान्तास्तु मूर्तीः परमेश्वरस्य

वृद्धाचलेशालयमण्डपेषु ।

स्थानेषु संस्थाप्य चकार पूजां

शिवागमप्रोक्तविशेषमार्गैरिति ॥

पुनरत्रायं विवेकः। बहुधा वेदविरुद्धार्थप्रतिपादकत्वमेव वेदबाह्यत्वं न सर्वथा। तथात्वे शिवशास्त्रेतरचार्वाकादिसर्वशास्त्राणामपि यथाकथञ्चिद्विरुद्धार्थप्रतिपादकत्वमस्तीति न सर्वथा बाह्यानीति यथानुरूपं प्रमाणानि सकलान्येव। तदुक्तं शिवागमे, गुरुकृतौ च :

चार्वाः भूतसंसिद्धाः स्मार्तास्तन्मात्रसंहतौ ।

वैशेषिकास्त्वहङ्कारे मानसाश्चेन्द्रिया अपि ॥

बुद्धितत्त्वे स्थिता बौद्धास्तत्त्वे न्यायवाः ॥

आर्हतास्तु गुणे तत्त्वे प्रकृतौ पाञ्चरात्रकाः ।

वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे स्थिताः ॥

शैव पौराणिका रागे सोमा विद्यापदे स्थिताः ।

कापालास्तु कलानिष्ठाः काले कालेश्वराः स्थिताः ॥

शिशाः कलान्तस्थाः पृथक् तस्मान्न चोदिताः ।

पाशुपतास्तु मायायां विद्यायां तु महाव्रताः ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रवाहेश्वरकास्त्वीशे प्रयोज्यकर्तृका अपि ।
ये सदाशिवतत्त्वस्थाः शिवसंबन्धवादिनः ॥
शक्तौ शाक्ताः शिवे शैवाः सामा .. स्मृता बुधैः ।
सिद्धान्ती शिवसायुज्यसिद्धिमनु . रिस्थित इति ।
तदिदमेव शिवसायुज्यमभीष्टमुक्तम् —
नाम्नश्छेदोऽपवर्गो न च पशुशिवयोरैक्यमत्रापवर्गो
नाविद्याग्रासहानिर्न च गुणविलयो नापि पाषाणमुक्तिः ।
यद्बोधानन्दरूपं त्रिमलविगमने व्यक्तमात्मस्वरूपं
तत् सायुज्येन वाच्यं शिवसदृशविभुः शैवतन्त्रे —
ऽपवर्गः ॥ इति

ततः साक्षान्महर्षित्वेन श्रुतिसिद्ध शिवकृतकत्वेनैव शिवशास्त्रस्य सामान्यार्थसूत्रशास्त्रादेरुत्कृष्टत्वं चानुक्त्वा सिद्धम् । तस्मात् सूतसंहितादिके —

अधःस्रोतोद्भवाद्धर्मादूर्ध्वस्रोतोद्भवः परः ।
उर्ध्वस्रोतोद्भवाद्धर्मात् स्मार्तधर्मो महत्तरः ॥
स्मार्तेभ्यः श्रौतधर्माश्च वरिष्ठा मुनिसत्तमा इति ।

क्वचिदर्थमन्यथोक्तमपि तदुक्तिरमलशिवमहावाक्येन बाध्यते । शिवागमस्य वेदादुत्कृष्टत्वमीशानमुखादुत्पत्ति— श्रुतेः ।

In Public domain. Digitization Muthulakshmi Research Academy

तदुक्तं श्रीमद्धालास्यमाहात्म्ये -

शिवज्ञानानि दिव्यानि कारिकादीनि भूसुराः ।
श्रीमद्धालास्यनाथस्य संभवन्त्यूर्ध्ववक्त्रतः ॥
पुनः स देवदेवस्य पुरुषाख्येन वक्त्रतः ।
एकविंशतिभेदेन युक्तं ऋग्वेदमब्रवीत् ॥
यजुर्वेदं चैकशतं . . . . ।
सहस्रभेदसहितं सामवेदं तु वामतः ॥
अथर्वं नवधा भक्तं सद्योजातेन चाब्रवीदिति ।

श्रीकामिके च -

ईशानवक्त्रादूर्ध्वस्थ . . . . कादिकम् ।
ऋग्यजुस्सामाथर्वाश्च पुरुषाद्य . . . . ॥
. . . मन्त्रतन्त्राख्यं सदाशिवमुखोद्गतम् ।
सिद्धान्तं गारुडं वामं भूततन्त्रं च भैरवम् ॥
ऊर्ध्वपूर्वकुबेराप्ययाम्यवक्त्राद्यथाक्रममिति ।

15a तस्मादाप्तपरमात्मोभयाप्तप्रणीतानां चार्वाकादिशैवसिद्धान्तानां सर्वेषां शास्त्राणां प्रत्यक्षादिप्रमाणानामिव यथानुरूपमधिगतानधिगतार्थगन्तृत्वेन बाध्यबाधकसामान्यविशेषव्याप्यव्यापकतटस्थलक्षणस्वरूपसाध्यसाधकसावधिनिरवधि प्रामाण्यं सिद्धम् । न हि स्वस्थमत -

In Public domain. Digitization Muthulakshmi Research Academy

मेकैकं प्रमाणम् । तथा स्वीकारे -

सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा ।

अथोभावपि सर्वज्ञौ मतिभेदस्तयोः कथमिति ॥

निर्वक्तुमशक्यत्वात् । सर्वाणि शास्त्राणि अप्रमाणानि स्युरित्यनिष्टं जगदान्ध्यमापतेत् । ततः सर्वाणि शास्त्राणि स्वस्वावधिप्रमाणान्येव । तथा साधितं श्रीरामकण्ठशिवाचार्येण रौरववृत्तिविवेके ।

तदुक्तं च पौष्करे -

अन्योऽपि मार्गो वेदादिः पशुपाशार्थदर्शकः ।

स्वोक्ततत्त्वावधिव्याप्तिर्ब्रह्मविष्ण्वादिकर्तृकः ॥ इति

परत्वान्मोक्षमार्गस्य स्थितस्वर्गादिभोगदः ।

न चार्षं पौरुषैर्वाक्यैः ऋषिभिर्दैविकं तथा ॥

न दैवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मना ।

तथा रौद्रं न हरिणा न रुद्रेण शिवात्मकम् ॥

बाध्यमूर्ध्वोर्ध्ववैशिष्ट्यादधोऽधो बाध्यमूर्ध्वतः ।

शिवागमाविरोधेन शास्त्रं सर्वं व्यवस्थितम् ॥

नान्यशास्त्राविरोधेन तत्संवादतयाथवा ।

शिवशास्त्रं व्यवस्थाप्यं तद्व्यवस्थापकं यतः ॥

In Public domain. Digitization Muthulakshmi Research Academy

यस्य यस्य हि शास्त्रस्य यावती व्याप्तिरिष्यते ।
तावत्येव भवेद्विप्राः प्रामाण्यं तस्य तस्य चेति ॥

सूतगीतायामपि सूचितम् -

तन्त्रोक्तेन प्रकारेण देवता या प्रतिष्ठिता ।
सा सुवन्द्या सुसेव्या च वन्दनीया च वैदिकैः ॥
राजा तु वैदिकान् सर्वान् तान्त्रिकानखिलानपि ।
असङ्कीर्णतया नित्यं स्थापयेत्मतिमत्तमः ॥
अन्नपानादिभिर्वस्त्रैः सर्वान् राजाभिरक्षयेदिति ।

ननु पूर्वं वेदादिकं सर्वं शास्त्रं शिवकर्तृकमित्युक्तम् । इदानीमन्योऽपि मार्गो वेदादिब्रह्मविष्ण्वादिकर्तृक इति । ब्रह्मविष्ण्वादिकर्तृकमित्युक्तम् । महान् विरोधः । सत्यम् । वेदादिकं सर्वं शास्त्रं शिवशास्त्रं च महामायायां नादात्मना प्रथमं शिववक्त्रातः वर्णपदवाक्यरचनात्मना पुनः साधिकरणनिरधिकरणशिवकृतमिति न कोऽपि विरोधः ।

तदुक्तं श्रीमत्कामिके -

लौकिकं वैदिकं चैव तथाध्यात्मकमेव च ।
अतिमार्गं च मन्त्राख्यं तन्त्रमेकमनेकधा ॥

In Public domain. Digitization Muthulakshmi Research Academy

सिद्धान्तं मन्त्रतन्त्रं स्यादतिमार्गं ततो वरम् ।
अध्यात्माय ततो नीचं तस्माद्वैदिकमेव च ॥
वैदिकाल्लौकिकं हीनं ब्रह्माद्याः पञ्च देवताः ।
सद्यो वाममहाघोरपुरुषेशानमूर्तयः ॥
प्रत्येकं पञ्चवक्त्राः स्युस्तैरुक्तं लौकिकादिकम् ।
सद्यमन्त्रादिनिष्क्रान्तो ब्रह्मा नामाखिलार्थदृक् ॥
तेन वै लौकिकं शास्त्रं मर्त्यलोकेऽवतारि . . ।
शब्दशास्त्रमलङ्कारं निरुक्तं छन्द एव च ॥
कौ . . भारतं ज्योतिश्शास्त्रं वात्स्यायनादिकम् ।
आयुश्शास्त्रं धनुश्शास्त्रं वृक्षायुर्वेद एव च ॥
लोकायतं तथा सांख्यमर्हतो मतमेव च ।
मीमांसा दण्डनीतिश्च वार्ताद्यं लौकिकं . . ॥
धाममन्त्राधिपो विष्णुः कारणेशो द्वितीयकः ॥
तेन वैदिकमुद्दिष्टमष्टादशपुराणकम् ॥
धर्मशास्त्रं च वेदान्तं पाञ्चरात्रं च बौद्धकम् ।
रुद्रो घोरादिनिष्क्रान्तस्त्वध्यात्मं च प्रणीतवान् ॥
न्यायवैशेषिकं सांख्यं . . . . . . रं च प्रणीतवान् ।
ईश्वरः पुरुषाज्जातस्त्वतिमार्गं प्रणीतवान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चार्थं लाकुलं चान्यत्तथा पाशुपतं मतम् ।
सदाशिवोऽपि भगवान् मन्त्रतन्त्रमपालयत् ॥
उक्तानि प्रतिषिद्धानि पुनः सम्भाषितानि च ।
सापेक्षानिरपेक्षाणि शिववाक्यान्यनेकधा ॥
ऊर्ध्वस्रोतोद्भवं सर्वमनन्तादीनबोधयत् ।
तेनोक्तं परमेशेन श्रीकण्ठाय महात्मने ॥
आदावभूद्द्विधा ज्ञानमधिकारविभेदतः ।
परापरेण भेदेन पतिपाशात्मदर्शकम् ॥
शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम् ।
वेदाद्यपरविज्ञानं पशुपाशार्थदर्शकम् ॥
यथाविधिक्षणं चक्षुः क्षपायां नृबिलालयोः ।
तथा विलक्षणं ज्ञानं द्वावेतत् परापरम् ॥
ज्योतिर्ज्ञानरतं वेदपुराणाहितचेतसा ।
नत्सिद्धपुरुषार्थेषु कृतयत्नं परित्यजेत् ॥
कामिकादिशिवज्ञानं वेदार्थज्ञानमेव च ।
समं यो मन्यते मोहात्तं प्रयत्नेन वर्जयेदिति ॥

पुनस्तत्रैव –

गारुडं भूततन्त्रं च भैरवं वाममन्त्रकम् ।
कापालं पाञ्चरात्रं च लाकुलं कुलशास्त्रकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

इतिहासं षडङ्गं च ऋग्यजुस्साम संज्ञकम् ।
अथर्वणं तथा बौद्धमर्हतो मतमेव च ॥
ऊर्ध्वस्रोतोद्भवाच्छास्त्रादपशान्तमुखक्रमात् ।
कामिकादिशिवज्ञानं मूर्धा भगवतः सदा ॥
इतराणि महेशस्य हृत्कण्ठाद्यङ्गकानि वै ।
पूर्वपक्षतया तानि कथितानीह शम्भुना ॥
हेयोपादेयवस्तूनां निर्णये परमार्थतः ।
तत्सर्वमधरीकृत्य शिवसिद्धान्त ईरित इति ॥

तथा महाभारते च वेदादेः साधिकरणशिवकृतकत्वमुक्तम् ।

युगान्तेऽन्तर्हितान् वेदान् इतिहासान् महर्षयः ॥
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवेति ।

वायव्यसंहितायां च -

आम्नायसिद्धमखिलं धर्माश्रमिणामिह ।
ब्रह्मणा कल्पितं पूर्वं ममैवाज्ञापुरस्सरौ ॥
स तु पैतामहो धर्मो बहुवित्तक्रियान्वितः ।
नात्यन्तफलभूयिष्ठ क्लेशायाससमन्वितः ॥
तेन धर्मेण महता श्रद्धां प्राप्य सुदुर्लभाम् ।
वर्णिनो ये प्रपद्यन्ते मामनन्यसमाश्रयाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

तेषां सुखेन मार्गेण धर्मकामार्थमुक्तये ।
वर्णाश्रमसमाचारो मया भूतः प्रकल्पितः ॥
तस्मिन् भक्तिमतामेव मदीयानां तु वर्णिनाम् ।
अधिकारो न चान्येषामित्याज्ञा नैष्ठिकी ममेति ॥

अतः "श्रुतिपथगलितानां मानुषाणां तु तन्त्रं" मित्युक्तं तन्त्रं न शिवागमः । तथा कृते शिवादधीतशिवतन्त्राणां सनकादीनां श्वेतोपमन्युकृष्णार्जुनमार्कण्डेयप्रभृतीनां च
556 श्रुतिपथगलितार्थश्रुत्यनधिकारित्वप्रसङ्गात् । तेषां चा-धीतशिवागमत्वमुक्तं स्कान्दे सम्भवकाण्डे —

ऽतस्मिन्नन्तरे देवः कैलासे रजताचले ।
सनकादिमुनीन्द्रेभ्यस्त्रिपदार्थार्थसम्मितम् ॥
रहस्यमागमाम्नाख्यं सिद्धान्तं कथयन्स्थित इति ।

उपदेशकाण्डे च —

पुरा ब्रह्मात्मजाः पुण्याः सनकश्च सनातनः ।
सनन्दनश्च भगवान् सनत्पूर्वकुमारकः ॥
चत्वारो ऋषयः शम्भोः पूजां पुण्यां विधाय च ।
प्रसन्नेन ततो वेदाच्छिवेनाध्यापिताः खलु ॥
आगमांश्च पुराणानि सेतिहासानि सुव्रताः ।
शिवार्चनपरा नित्यं शिवयोगेन पावनः (नाः) ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवज्ञानाग्निना दग्धमहापातकसञ्चया इति ।

शिवपुराणे काञ्चीपुरमाहात्म्ये च —

सनत्कुमारः पप्रच्छ साञ्जलिः कमलासनम् ।
भगवन् सकला वेदाः साङ्गोपाङ्गाः ससंहिताः ॥
शिवागमास्तथा सर्वे श्रुता भवतो मुखादिति ।

(३)
स्कान्दे श्वेतारण्यमाहात्म्ये, पुण्डरीकपुरमाहात्म्ये —

व्याघ्रपादसुतो यत्र पुरा स्नात्वा महामुनिः ।
शिवागमस्य वै पारं गतोऽप्राप्यं सुरैरपि ॥
यस्य शिष्योऽभवत् कृष्णस्तत्तीर्थं नवमं स्मृतमिति ।

उपदेशकाण्डे च —

पुनश्च वसुदेवस्य देवक्यां कृष्णरूपधृक् ।
जज्ञे विष्णुरमेयात्मा भृगुशापनियन्त्रितः ॥
तत्राभ्यर्च्य महादेवं कृत्वा शत्रुजयं पुनः ।
उपमन्युं समासाद्य विधिना तेन दीक्षितः ॥
(तस्मी)
शैवमुख्यस्ततो नीर्थं भक्त्याराध्य च शङ्करम् ।
भूभारमपनीयाथ विष्णुलोकं जगाम स इति ॥

तत्रैव बाणासुरं प्रति शिववचनं —

तमाह पूर्ववन्नैव जेतुं शक्यस्त्वयासुर ।
इदानीं मम भक्ताग्र्यादुपमन्योर्महात्मनः ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवदीक्षास्य

शिवागमानां पानं च शैवाचार्यत्वमेव च ।
(प्य)
लब्ध्वा च परमं योगं शिवसारूप्तां गतम् ॥
यस्य नाम्ना वनमिदं कथितं सवनत्रये ।
अवनायास्य भक्तस्य श्वेतनाम नृपस्य त्विति ॥

निर्वृत्तं शिवागमविशारदात् —

भस्मधारी च सततं वीर्यवान् भक्तिसंयुत इति ।

तत्रैव -

सोऽपि संप्राप्य नित्यत्वं मार्कण्डेयो महामुनिः ।
स्वगृहं प्राप्य परया प्रीत्या पित्रोः समावसत् ॥
अनन्यसदृशो लोके शिवशास्त्रविशारदः ।
शिवागमार्थविज्ञानसंपन्नोऽद्यापि वर्तत इति ॥

किं तु श्रुतिपथगलितानां मानुषाणां तु तन्त्रमित्यत्र तन्त्रं "नादरूपं विनिष्क्रान्तं शास्त्रं सर्वमिति" श्रुते — नादात्मा शिवकृतवर्णपदवाक्यरचनात्मना शम्भुपदोपलक्षितश्रीरीश्वरप्रेरितमाया रुद्रकृतं वामादितन्त्रमिति मतिमदूह्यम् । तदुक्तं कामिके —

वामं पाशुपतं चैव लाकुलं चैव भैरवम् ।
न सेव्यमेतत् कथितं वेदबाह्यं तथेतरमिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूतसंहितावृत्तौ च विद्यारण्यस्वामिभिः शिवागमो-
दाहरणं स्वीकृत्य लिखित्वा गुरुणा चोपदिष्टोऽपि
तन्त्रसंबन्धवर्जित इत्यत्र । तन्त्रसंबन्ध इति ।
कापालं लाकुलं वाम मित्यादि वेदविरुद्धागम -
संसर्गरहित इति व्याख्यातम् ।

तथा हालास्यमाहात्म्ये विक्रमपाण्ड्यचरिते पाण्ड्यस्य
वेदबाह्यशास्त्राणि परित्यज्य शिवशास्त्रस्य श्रवणं
श्रुतम् ।

प्रसृता वैदिका धर्माः सर्वतः क्षितिमण्डले ।
वेदबाह्यमना ये च ते गच्छन्ति सुदूरतः ॥
सदा शैवानि शास्त्राणि पुराणानि शुभानि च ।
शृणोति विद्वद्वक्त्रेभ्यः सावधानश्च सादरमिति ॥

तथा शिवागमस्य पूज्यत्वमुक्तं वायव्यसंहितायां —

(वाग्मिना)
मन्नामनिरता वाणी वाङ्मतां मम नेनश ।
लिङ्गैर्मच्छासनोद्दिष्टैस्त्रिपुण्ड्रादिभिरङ्कितः ॥
ममोपचारनिरतः कायः कायो न चेतरः ।
मदिज्याकर्म विज्ञेयं बाह्यं यादिनोच्यते ॥
मदर्थे देहसंशोषस्तपः कृच्छ्रादिनो मतः ।
जपं पञ्चाक्षराभ्यासः प्रणवाभ्यास एव च ॥

In Public domain. Digitization Muthulakshmi Research Academy

रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम् ।
ध्यानं मद्रूपचिन्तार्थं नान्यदर्थं . . . . य: ॥
ममागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनमिति ।

तथा यथाकथञ्चित्सामान्यविशेषत्वविलक्षणत्वेऽपि उभाभ्यां वेदान्तसिद्धान्तमार्गाभ्यामसंशयं मोक्षप्राप्तिरस्ति । तदुक्तं स्कान्दे चिदम्बरमाहात्म्ये –

वेदान्तनिष्ठिता ये तु ज्ञानिनो वीतकल्मषा: ।
मदागमपरा ये च ज्ञानपादैर्व्यवस्थिता: ॥
उभयेऽपि च विन्दन्ति सायुज्यमतिदुर्लभम् ।
उभयेषु च मार्गेषु कर्म ब्रह्मपरेषु च ॥
वेदागमप्रसिद्धेषु ये न तिष्ठन्ति पापिन: ।
चतुर्विधैश्च ते दण्ड्या दण्डै: शास्त्रप्रचोदितैरिति ॥

उभयेऽपि च विन्दन्ति सायुज्यमतिदुर्लभमिति श्रुतेरयं विवेक: । सिद्धान्तानुसारिणो वेदान्तिनोऽपि वेदान्तज्ञत्वेऽपि प्रकृत्यूर्ध्वशिवागममात्रसिद्धरागादिशिवतत्वान्तपदार्थज्ञानार्थं मोक्षार्थं च शिवदीक्षावन्त: सन्त: ~~[crossed out]~~ सद्य: सत्यशिवसायुज्यं विन्दन्ति । शिवदीक्षाराहित्ये वेदान्तज्ञत्वेऽपि न साक्षाद्विन्दन्तीति ।

In Public domain. Digitization Muthulakshmi Research Academy

तदुक्तं सूतसंहितायां –

स्थापयित्वा गुरुः शिष्यं मण्टपस्य तु मध्यमे ।
ग्रन्थिच्छेदं पुनः कुर्यात् गुरूक्तेनैव वर्त्मना ॥
कृते कारुणिकेनैवमाचार्येण द्विजोत्तमाः ।
महादेवो महानन्दो महाकारुणिकोत्तमः ॥
स्वात्मभूतां परां शक्तिं प्रेरयत्येव सुव्रताम् ।
प्रसन्ना सा महादेवी महाकारुणिकोत्तमा ॥
शिष्यस्यात्मनि चिद्रूपे स्वयं पतति निर्मला ।
महादेवस्य भक्तश्चेत् शिष्यः सद्गुरुभक्तिमान् ॥
तस्य शिष्यस्य विप्रेन्द्राः कर्मसाम्ये मतिर्द्विजाः ।
शाम्भवी शक्तिरत्यर्थं तस्मिन् पतति चिद्घने ॥
तस्य प्रसादयुक्तस्य विद्या वेदान्तवाक्यजा ।
दहत्यविद्यामखिलां मन्तस्सूर्योदयो यथा ॥
शक्तिपातविहीनोऽपि सत्यवाक् गुरुभक्तिमान् ।
आचार्याच्छ्रुतवेदान्तः क्रमान्मुच्येत बन्धनात् ॥
शक्तिपातप्रकारस्य रहस्यांशश्च कश्चन ।
मया नोक्तो रहस्यत्वात् राज्ञा भङ्गभयादपीति ॥

अत्राप्ययं विवेकः। शक्तिर्दीक्षाकर्मसंपादयित्री सती ततः पूर्वं सामान्यरूपिणी पतति, पश्चाद्दीक्षा –

In Public domain. Digitization Muthulakshmi Research Academy

156a कर्मणि साक्षाद्दीक्षात्मिका सती विशेषरूपिणी पतति । तथा पतती शक्तिः।

तस्माद्वैदिकमार्गेण मलनाशो न विद्यते ।
शैवागमोक्तमार्गेण दीक्षया मोक्ष एव हीति ॥

दैव्यामतवचनात् मलमौढ्यात्मिकामविद्यां क्रमतो दहति। दीक्षानन्तरं वेदान्तवाक्यजा विद्या पृथिव्यादि प्रकृत्यन्त-तत्त्वविषयात्मनात्मन्यात्मज्ञानादिरूपां प्रकृतिजामविद्यां क्रमतो दहति। पश्चात् सिद्धान्तवाक्यजा विद्या राग-तत्त्वादि शिवतत्त्वान्ततत्त्वविषयां तथाभूतां मायाजाम-विद्यां क्रमतो दहतीति तावत्कालं प्रकृतेरूर्ध्वं पुरुषतत्त्वभुवनं प्राप्य महाभोगं भुञ्जतीति तात्पर्यम्। तदुक्तं सर्वज्ञानोत्तरादिके –

तामसं जिनभक्तानां पौरुषं ब्रह्मवादिनाम् ।
नासतो विद्यते भावो नाभावो विद्यते सतः ॥
तस्मादेकात्मवादोऽयं कल्पितो मूढचेतनैः ।
इत्यद्वैतग्रहाविष्टाः प्रलपन्ति दयालुभिः ॥
गुरुभिः प्रतिबोध्यन्ते सिद्धान्तागमदायिभिः ।
अद्वैतबलमाश्रित्य ये विशृङ्खलवृत्तयः ॥

In Public domain. Digitization Muthulakshmi Research Academy

तेषामद्वैतनिष्ठा पुंस्तत्त्वे विलयो भवेत् ।
वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे स्थिता

इति । क्वचित्कथञ्चिद्वेदोपबृंहणत्वेन शिवागमानां सौम्यत्वमुक्तं तन्न पारमार्थिकम् । किन्तु सौम्यत्वं स्वाभाविकम् ।

तदुक्तं कामिके -

तथा पाशुपतं सोमसिद्धान्ताख्यं च लाकुलम् ।
गारुडं भैरवं वामं भूततन्त्रं च यामलम् ॥
कापालं पाञ्चरात्रं च बौद्धमप्यार्हतं तथा ।
बृहस्पतिमतं सांख्यं योगं वैखानसस्तथा ॥
वेदान्ताख्यं च मीमांसा पुराणं धर्मशास्त्रकम् ।
वस्तुशास्त्रं तथा सूत्रं षडङ्गमितिहासकम् ॥
तथा वेदाश्च चत्वारो यत्तत्र परिचोदितम् ।
सर्वं रौद्रं समादिष्टं सिद्धान्तं सौम्यमिष्यते ॥
रौद्रैश्च स्थापितं यच्च विष्ण्वादिप्रतिमादिकम् ।
तत्सर्वं शैवमापाद्य शैवः समर्चयेत् ॥
लिङ्गाद्यमादिशैवेन स्थापितं पूजितं तु वा ।
तद्रूपं पूजितं तैश्चेद्राष्ट्रं राजानमेव हि ॥

In Public domain. Digitization Muthulakshmi Research Academy

तद्ग्रामं ग्रामसंस्थांश्च सर्वान् हन्ति न संशयः ।
यजनं त्रिविधं प्रोक्तं उत्तमं मध्यमाधमम् ॥
केवलं शिवमन्त्रैस्तु यजनं चोत्तमं भवेत् ।
वैदिकैः शिवमन्त्रैस्तु श्च यजनं मध्यमं भवेत् ॥
केवलं वैदिकैर्मन्त्रैर्यजनं चाधमं भवेत् ।
केवलं शैविकैर्मन्त्रैर्यजेदात्मार्थमुत्तमम् ॥
शैवमन्त्रसमो मन्त्रो नास्तीति भुवनत्रय इति ।

स्कान्दे युद्धकाण्डे कुमारविश्वरूपप्रदर्शनाध्याये —

शब्दजालमशेषं तत् कर्णदेशे समाश्रितम् ।
आस्यमध्ये स्थिता वेदा देवदेवस्य भूसुराः ॥
अक्षराणि च दन्तेषु जिह्वायां तु शिवागमाः ।
सप्तकोटिमहामन्त्रा ओष्ठमध्ये व्यवस्थिता इति ॥

चिदम्बरमाहात्म्ये—

इति देवान् समाहूय ध्वजं वृषभलाञ्छितम् ।
पुरं प्रदक्षिणीकृत्य सभेशस्य तु सन्निधौ ॥
दृढमारोपयामासुरागमोक्तेन वर्त्मनेति ।

शिवपुराणे ... नाथमाहात्म्ये —

शिवार्चनं तपो मुख्यं वेदागमनिरूपितम् ।
तपःसिद्धिप्रदस्थानं पुण्डरीकपुरं महदिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवपुराणे एकाम्रनाथमाहात्म्ये इन्द्रस्य शिवपूजाप्रकरणे—

तत्र ..... शिवतन्त्रोक्तैर्व्रतहोमजपादिभिः।

प्रत्यहं प्रीणयामास कामाक्षीरमणं शिवमिति॥

शिवपुराणे विरिञ्चिमाहात्म्ये—

शिवनायक इत्यासीच्छिवभूसुरनायकः।

कामिकाद्यागमार्थज्ञः साक्षादिव महेश्वर इति॥

शिवपुराणे कालहस्तिमाहात्म्ये—

सुवर्णमुखरीस्नातो जावागमिकान्मनून्।

प्रायश्चित्तविधानेन प्रसन्नात्मा स भूसुरः॥

यथातन्त्रं प्रयुज्येशं ययौ भूयस्तपोवनमिति।

शैवपुराणे पुण्डरीकमाहात्म्ये—

शिवशास्त्रं लिखित्वा यो ददाति शिवयोगिने।

रौद्र भक्तिसंयुक्तः शिवसायुज्यमाप्नुयादिति॥

हालास्यपुरमाहात्म्ये—

महालिङ्गस्य पूजार्थं शिवसृष्टद्विजोत्तमान्।

गङ्गातीरस्थनिरतान् समाहूय महीपतिः॥

सिद्धान्तैः कामिकाद्यैस्तु महालिङ्गं निरन्तरम्।

पूजयन्त्विति संप्रार्थ्य वृत्तिं तेभ्यः प्रदाय चेति॥

In Public domain. Digitization Muthulakshmi Research Academy

पुनस्तत्रैव –

गङ्गातीर्थस्य सलिलैर्हैमकुम्भसुसंभृतैः ।
शिवागमोक्तैर्विधिभिरभिषिञ्चन् महोत्सवमिति ॥

वेदारण्यमाहात्म्ये कुलेश्वरवैभवे –

आगमोक्तेन मार्गेण पूजयामासुरादरात् ।
सुधारूपं महेशानं शङ्करं शशिभूषणमिति ॥

शिवपुराणे रामेश्वरमाहात्म्ये –

मन्त्रैरागमिकैस्तैस्तैर्महितं रामपूजितम् ।
रामेश्वरेति लिङ्गं तु तदाप्रभृति पप्रथ इति ॥

आगमादिपदनिर्वचनं चोक्तमंशुमदादिके ।

आगतं शिववक्त्रात्तु गतं च गिरिजामुखे ।
मतं च ऋषिभिः सर्वैर्यस्स आगम ईरितः ॥
तत्त्वमागम्यते येन आगमो वेति च स्मृतः ।
ततोऽतिविपुलानर्थांस्तत्त्वमन्त्रसमाश्रितान् ॥
त्राणं च कुरुते पुंसां तेन तन्त्रमिति स्मृतमिति ।

इति शिवागममाहात्म्यं समाप्तम् ॥

दीक्षा-माहात्म्यम्

तदित्थं भूतं शिवशास्त्रं प्रोक्तप्रकारं दीक्षितैरेव श्रोतव्यं पठितव्यं च । दीक्षाविहीने तु ज्ञानादिकं सर्वं व्यर्थं स्यात् ।

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानादेरस्वातन्त्र्याद्दीक्षाङ्गत्वेनैव ज्ञानादिकं मोक्षसाधनं नान्यथा तदुक्तम्—(तस्य तेन तदङ्गत्वं)

तस्य तेन तदङ्गत्वं दीक्षा सा तोऽङ्गिनी भवेत् ।
शिवदीक्षां तु मुक्त्वैकां सपत्राण्याहृतां पराम् ॥
ज्ञानतो योगतश्चापि चर्यातश्च न मुच्यते ।
ज्ञानादीनां तु सामर्थ्यं तत्रापि स्वर्गं विद्यते ॥
बालबालीशवृद्धस्त्री भोगिनां सरुजां तथा ।
ज्ञानादिना न मोक्षोऽस्ति तस्माद्दीक्षैव मोचिनीति ॥

केवलं ज्ञानादेव मोक्ष इत्यत्रापि ज्ञानशब्दस्य दीक्षादिरेवार्थः ।

तदुक्तं सुप्रभेदे—

अथातः संप्रवक्ष्यामि ज्ञानपादं समासतः ।
तस्यादौ शिवसृष्टिश्च शृणुष्वैकाग्रमानसः ॥
ज्ञानं प्रवर्तते वत्स भ्रान्तिनिर्णाशनाय च ।
अध्वश्रेणिविनाशाय शिवव्यक्तिकराय च ॥
अन्धकारवदज्ञानं ज्ञानं दीपवदुच्यते ।
ज्ञेयं भास्करवत्प्रोक्तं पश्चाद् ज्ञानं विनश्यति ॥
पाशजालानि विच्छेद्य दीक्षादिर्ज्ञानमुच्यते ।
पशुपाशपतित्वं च ज्ञानेनाश्रयते बुधः ॥

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानेनैव तु कैवल्यप्राप्तिस्तत्र न संशय इति ।

दीक्षा च दीक्षाकर्मण्यभिव्यक्ता ना ।

157a विनेज्ञानत्वकर्मादि मनोऽ्या पारमात्मनः ।

दीक्षाज्ञानवती प्रोक्ता सम्यक्तत्त्वावबोधिका ॥

इज्यानल्पवती या तु क्रियाकौशल्यसंभवा ।

क्रियावत्यथ सानेका निर्बीजाथ सबीजिका ॥

कालोत्तरे-

दीक्षा क्रियावती प्रोक्ता ब्राह्मणादिचतुष्टये ।

पुनर्होत्री त्रिधा प्रोक्ता . . . ॥

वामने-

शाम्भवी चैव शाक्ती च मान्त्री चेति शिवागमे ।

दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना ॥

नासाग्राच्चुलिका यावत् तत्त्वज्ञानदृशा गुरुः ।

गुरोरालोकमात्रेण स्पर्शात् सम्भाषणादपि ॥

सद्यः संजायते चात्र पाशोपक्षेयकारिणी ।

सा दीक्षा शाम्भवी प्रोक्ता सा पुनर्भिद्यते द्विधा ॥

तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः ।

यथा स्यान्निर्वृत्तिः सद्यः सैव तीव्रतरा मता ॥

In Public domain. Digitization Muthulakshmi Research Academy

तीव्रा तु जीवतोऽत्यन्तं पुण्यपापविशोधिका ।
शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य च ॥
गुरुणा योगमार्गेण क्रियते ज्ञानचक्षुषा ।
मान्त्री क्रियावती दीक्षा कुण्डमण्डपपूर्विका ॥
मन्दमन्दतरोद्देशात् कर्तव्या गुरुणा बहिः ।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत् ॥
योऽन्यथा कुरुते मोहात् स विनश्यति दुर्मतिरिति ।
एका ज्ञानवती प्रोक्ता द्वितीया तु क्रियावतीति च ॥

श्रीमच्चिन्त्यविश्वसादाख्ये प्रोद्धृत्योक्त्वा पुनः –

एवं मान्त्री क्रिया दीक्षा संपन्नो गुणसत्तमः ।
स एव योगदीक्षायामधिकारी च नान्यथा ॥
पूर्वदीक्षासमायुक्तशिष्याणामुत्तमं तथा ।
प्रणवं शक्तिसंभूतं शाम्भवं त्रिविधं भवेत् ॥
शाक्ती शाम्भवदीक्षा च क्रियते तत्त्वया मया ।
अन्यैराणवदीक्षा तु मन्दतीव्रादिभेदतः इति च
प्रोक्तम् ।

अन्यैरपि योगतत्त्वगुरुभिः क्रियादीक्षामन्तरापि अतिपक्वेऽतिदरिद्रे वा मन्त्रादिवैकल्यकृतक्रियादीक्षे वा शाक्तिशाम्भव्योरेकतरस्वान्तरितान्या च कार्येति गुरवः ।

In Public domain. Digitization Muthulakshmi Research Academy

यथाकथञ्चित्कृताभ्यासयोगिभिरपि गुरुभिर्मन्त्र-क्रियाभावना साङ्गोपाङ्गस्याकलयवत्या क्रियादीक्षया दीक्षितस्य कृतस्य करणासंभवादिति न्यायाच्चोदनवत् क्रिया क्रि दीक्षाङ्गतया सद्यः समुच्चरितप्रासादमन्त्रसमुद्धृति-कृतशिवयोजनषाड्गुण्योदयशिवत्वाभिव्यक्तिसंपादिका तत्मन्त्रमन्त्रात्मिका सती सह संक्षिप्ता शाक्ती शाम्भवी च सहकार्येत्यप्यर्थोऽन्तः स्फुरति । तदेतत्त्रिविधदीक्षा-विहीनः पशुः । तदुक्तं –

चतुर्वेदधरो विप्रः शिवदीक्षाविवर्जितः ।
दुष्टचाण्डालभाण्डेषु यथा भागीरथीजलम् ॥
कोटिविप्रसमः शूद्रः शिवदीक्षासमन्वितः ।
सुदुर्लभं शिवज्ञानं तदभ्यासश्च सुदुर्लभः ॥
सुदुर्लभमिदं ज्ञात्वा शिवे भक्तिं समाचरेदिति ॥

इति शिवदीक्षामाहात्म्यं समाप्तम् ॥

शिवभक्तमाहात्म्यम् ॥

ततः शिवशास्त्रं शिवदीक्षया दीक्षितैश्चतुर्वर्णैरेव पठितव्य(म्) । तदुक्तं च सुप्रभेदे –

साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

शुद्धशैवमिदं तन्त्रं न देयं न प्रकाश्यकम् ॥
दीक्षितस्यैव धीरस्य शिवभक्तिपरस्य च ।
श्रावणीयं न चान्यत्र कथनं हि प्रशस्यते ॥
चतुर्णां शुद्धशैवानां दीक्षया प्रापयेच्छिवम् ।
लौकिकाचारमार्गेण सर्वेषां वर्तनं शृणु ॥
अध्ययनं चाध्यापनं यजनं याजनं तथा ।
शिवमुद्दिश्य यद्द्रव्यं दत्तं तद्दानमेव च ॥
प्रतिग्रहं ततो वाथ तस्य षट्कर्म उच्यते ।
शिवसद्भावयुक्तस्य शुद्धशैवस्य धीमत ॥ इति ॥

मकुटे -

निर्वाणदीक्षितानां तु दातव्यं शिवयोगिनाम् ।
अन्येषां तु न दातव्यमिदं तन्त्रमनुत्तममिति ॥

काञ्चीपुरमाहात्म्ये च -

ब्राह्मणं वेदविद्वांसं शिवभक्तं जितेन्द्रियम् ।
भूतिरुद्राक्षसंपन्नं शिवपूजापरायणम् ॥
आगमार्थपरिज्ञाननिरतं शिवधर्मिणम् ।
क्षात्त्रं वैश्यमपि वा शूद्रं वा प्रतिलोमजम् ॥
अनुलोमोद्भवं वापि साक्षादाम्रेशसंश्रयम् ।
भक्त्या वित्तानुसारेण गृहहोत्रधनादिभिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

वासयेदधिका . . शे चरणाम्भोजभक्तितः ।
प्रतिष्ठया तु देवानां यत्फलं तदुदीरितम् ॥
तत्फलं सकलं लब्ध्वा मुच्यते भवसागरादिति ।

शैवपुराणे -

इदं हि शिवभक्ताय शिवशास्त्रावलोकिने ।
शिवदीक्षाविशुद्धाय प्रकाश्यं मुनिपुङ्गवा इति ।

तथा किरणे पञ्चवृत्तौ भगवता रामकण्ठाचार्येण ।
अत एवास्य निर्वाणदीक्षा संपन्नेति प्रतीयते ।
नादीक्षितानां श्रवणाधिकार इति वक्ष्यतीत्युपक्रम्य
यदवाप्य नराः सर्वे इत्यत्र सर्वे इति ब्राह्मणाः क्षत्त्रिया
वैश्याः शूद्रा म्लेच्छादयोऽपि हीति श्रुत्याधिकारिण एव
गरुत्मतोऽधिकारप्रक्रमतः सर्वपदस्यानियतार्थत्वादिति
व्याख्यातम् । न तु दीक्षाविहीनैः पठितव्यम् ।

तदुक्तं कामिके -

दीक्षाविहीना विप्राद्यास्त्रिवर्णाः शूद्रजातयः ।
पठन्ति शिवशास्त्रं चेद्राजराष्ट्रं विनश्यति ॥

चिन्त्यविश्वे -

विप्राद्यदीक्षितेनैव शिवज्ञानं न लेखयेत् ।
अदीक्षितसकाशे तु नाध्येतव्यं विशेषत इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

वीरतन्त्रे -

नादीक्षितैस्तु श्रोतव्यं न देयं न प्रकाश्यकम् ।
शिष्याणां चैव दातव्यं समासात् कथयामि त इति ॥

अन्यत्र च -

परशुना लेखयेन्नैव शिवज्ञानं प्रयत्नतः ।
न समीपे पशूनां च कुर्यादध्ययनं बुध इति ॥

चतुर्वर्णेष्वपि दीक्षिता एव श्रेष्ठाः । तदुक्तं शैवपुराणे -

गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्य च ।
शिवसंस्कारसंबन्धाज्जातिभेदो न विद्यते ॥
शिवदीक्षाभिजातस्य पूर्वजातिं न चिन्तयेत् ।
संप्रतिष्ठितलिङ्गे तु न यथापूर्वभावनेति ॥

शिवधर्मे -

स्थावरं जङ्गमं चैव द्विविधं लिङ्गमिष्यते ।
स्थावरं स्थापितं लिङ्गं जङ्गमं दीक्षितं विदुः ॥
1576 जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत् ।
तस्माल्लिङ्गद्वयं प्राज्ञो नावमन्येत सर्वदेति ॥

श्रीमत्मतङ्गे -

शिवबद्धिव . . . . . शिवकाङ्क्षिभिः ।
संस्कृताश्च शिवैर्मन्त्रैर्गुरुणा मन्त्रमूर्तिना ॥

In Public domain. Digitization Muthulakshmi Research Academy

वागीशीगर्भसंभूतास्सर्वे प्राप्तवशा नराः ।
यथोक्तशिवसंस्कारपवित्रीकृतमूर्तयः ॥
सर्वे समानधर्माणस्तथाप्येष विधीयत इति ॥

कामिके -

इन्धनं वह्निसंयोगाद्वृक्षनाम न विद्यते ।
गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्य तु ॥
शिवसंस्कारसंबन्धाज्जातिभेदो न विद्यत इति ।

अन्यत्र च -

काञ्चनं राजतं ताम्रं लोहं चेति चतुष्टयम् ।
तत्प्रयाति सुवर्णत्वं रसभेदप्रभावतः ॥
रससिद्धं यथा ताम्रं न भूयस्ताम्रतां व्रजेत् ।
ज्ञानसिद्धस्तथा देही न भूयः शूद्रतां व्रजेत् ॥
यथा शुक्तिगतं तोयं मौक्तिकं जायते ध्रुवम् ।
न पुनस्तोयतां याति मौक्तिकत्वं न मुञ्चतीति ॥

ज्ञानलक्षणसमुच्चये -

वागीशी जननी यस्य व्योमव्यापी पिता शिवः ।
मन्त्रैः शिवाध्वरे जातः स शूद्रः स्यात् कथं त्विति ॥
मृद्भावना घटादीनां संस्कारान्न कदा यथा ।
तथैव पाशहानाच्च न प्राकृत्यस्तु जातयः ॥

In Public domain. Digitization Muthulakshmi Research Academy

नराणां शिवसंस्कारात् शिवत्वं न भवेद्यदि ।
न भवेयुस्तदा नूनं द्विजदेव्यादिदेशिकाः ॥
मन्त्रसंस्कारदीक्षाभिः संस्कृतं गुरुणा सदा ।
चराचरं प्रपच्येत शिवत्वं तत्क्षणाद् ध्रुवमिति ॥

चिन्त्यविश्वे –

शिवलिङ्गे शिलाबुद्धिं कुर्वाण इव पातकी ।
श्रेष्ठत्वं विद्यते तस्य दीक्षया तु विशेषतः ॥
यस्य चित्तं भवेल्लीनं तस्य जात्यादि न स्मरेत् ।
शूद्रजातिं समुद्धृत्य स्वाहान्तेनैव मूलतः ॥

स्कन्दकालोत्तरे –

जात्युद्धरणहोमं तु शकैकं तु शतं शतम् ।
दहेद्वै शूद्रजातिं तु अनलेन तु षण्मुख ॥
सच्छूद्रत्वं योजयित्वा क्रियां वै षोडशीं कुरु ।
साक्षाद्विप्रत्वमापन्ने पश्चाद्दीक्षां कुरुष्वथ ॥
त्रैवर्णिकानामेवं तु कारयेद्विधिना बुध इति ॥

कामिके –

नमो वौषट् च शूद्रस्य प्रणवादिविवर्जितम् ।
निर्वाणदीक्षितो यस्तु प्रणवेन तु योजयेदिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

मकुटे च -

निर्वाणदीक्षितेन्द्रे· प्रणवं तु नियोजयेदिति ।

सुप्रभेदे -

यतीनां शुद्धशैवानां मर्त्यमाहेश्वरात्मनाम् ।
विशेषभोजनं दानं कुर्यात्तत्रैव शक्तित इति ॥

अदीक्षिता यद्यपि शिवभक्ता मुक्तभक्तीतरेऽप्यश्रेष्ठा भवन्ति । शिवभक्तलक्षणमुक्तमुपदेशकाण्डे -

शिवभक्ता महात्मानः सन्ति देवेषु केचन ।
दैत्येषु यातुधानेषु यक्षगन्धर्वभोगिषु ॥
मुनीश्वरेषु मर्त्येषु ब्राह्मणेषु नृपेष्वपि ।
ऊरुजेष्वपि शूद्रेषु संकरेष्वपि सर्वशः ॥
वर्णाश्रमव्यवस्थाश्च नैषां सन्ति मुनीश्वराः ।
केवलं शिवरूपास्ते सर्वे माहेश्वराः स्मृताः ॥
अतिवर्णाश्रमाः प्रोक्ताः सर्ववेदेषु सत्तमा इति ।

वायवीयसंहितायां -

शिवमष्टविधं लिङ्गं यस्मिन् म्लेच्छेऽपि वर्तते ।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ॥
न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचोऽपि यः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहमिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

वासिष्ठलैङ्गे –

शिवेति वाचं यो नित्यं चण्डालोऽपि वदेन्मुदा ।
सह तेन वदेद्वाचं सह तेन वसेत् सदेति ॥

वृद्धाचलमाहात्म्ये च –

चिह्नैर्युतो विप्रवरश्च विद्वान्
यदि श्वपाकोऽपि स एव भक्तः ।
नान्यश्चतुर्वेदधरोऽपि पूज्यो
देयं च तस्मै सशिवस्वरूपः ॥

उपदेशकाण्डे –

पापिष्ठस्यापि वै मुक्तिर्भस्मरुद्राक्षधारिणः ।
इति सर्वत्र वेदेषु पुराणेष्वागमेष्वपि ॥
बहुधा गण्यते लोके सर्वैरपि महात्मभिरिति ।

भक्तिलक्षणं चोक्तं सूतसंहितायां –

शिवज्ञानैकनिष्ठानां शिवज्ञानस्य सुव्रत ।
दूषकस्य शिरश्छेदः शिवभक्तिः प्रतीयते ॥
लेखनं शिवविद्यायाः प्रदानं पुस्तकस्य च ।
शिवभक्तिरिति प्रोक्ता शिवशास्त्रविशारदैरिति ॥

किरणे –

भोज्यमन्नं त्रयाणां तु शूद्रान्नं न कदाचन ।

In Public domain. Digitization Muthulakshmi Research Academy

शौचाचारसमायुक्ताः शूद्रा ये मद्यपाः शुभाः ॥
~~रुद्रार्चनपरा भक्ताः शूद्रा ये मद्यपाः शुभाः ॥~~
रुद्रार्चनपरा भक्ता भोज्यन्ते भोग्यजातधीति ।

इति शिवभक्तमाहात्म्यम् ॥

समाप्तम् ॥

आदिशैवादिमाहात्म्यम् ॥

कामिके -

ऋषीणामपि सर्वेषां वक्ष्ये गोत्रविनिर्णयम् ।
द्विविधं गोत्रमत्रोक्तं दीक्षोत्थं जातिजं तथा ॥
कौशिकः काश्यपश्चैव भरद्वाजोऽथ गौतमः ।
अगस्त्योऽत्रिर्वसिष्ठस्तु जमदग्निश्च भार्गवः ॥
अङ्गिराश्च मनुश्चाद्यो द्विविधाश्च प्रकीर्तिताः ।
शिवसृष्टिसमोपेता मुनयस्तद्विवर्जिताः ॥
शिवसृष्ट्यन्विताश्चैते पञ्चवक्त्रेषु दीक्षिताः ।
शिवेन तत्कुलोत्थाः स्युः शैवाः सान्तानिका द्विजाः ॥
आदिशैवास्तु ते ज्ञेयाः सर्वानुग्राहकाः स्मृताः ।

In Public domain. Digitization Muthulakshmi Research Academy

सुप्रभेदे -

दीक्षितानां द्विजातीनामात्मार्थमनुलोमिनाम् ।
परार्थमादिशैवानामात्मार्थसहितं भवेत् ॥

कामिके -

वृत्त्यर्थं ये शिवं विप्राः सामान्यास्त्वर्चयन्ति चेत् ।
षाण्मासात् पतनं यान्ति यस्मात्तान् परिवर्जयेत् ॥
शिवदीक्षाविशुद्धस्य शिवविप्रस्य धीमतः ।
शिवाज्ञावशतस्तस्य परार्थे नास्ति दोषदा ॥

शिल्पे -

शिवार्चनं शैवशिवद्विजानां
वैखानसं पूजनमेव विष्णोः ।
तथार्चयेदन्यमहीसुरश्चे -
च्चाण्डालकं देवलकं वदन्ति ॥

अन्यत्र -

अदीक्षितस्तु विप्राणां षाण्मासं पूजयेद्यदि ।
षाण्मासात्पतनं यान्ति स वै देवलकः स्मृतः ॥

वीरतन्त्रे -

(वृ)भृत्यर्थं सर्वदा कालमादिशैवः शिवं यजेत् ।
तत्र स्वधर्मानुष्ठानं न दोषाय प्रकल्पते ॥

In Public domain. Digitization Muthulakshmi Research Academy

अदीक्षितश्चतुर्वेदी शिवलिङ्गं तु न स्पृशेत् ।
दीक्षितश्चापि यो विप्रो वृत्यर्थं तु न पूजयेत् ॥
आत्मार्थपूजनं कुर्यात् परार्थं नैव पूजयेत् ।

वीरतन्त्रे -

अदीक्षितश्चतुर्वेदी शिवपूजां न कारयेत् ।
158a वृत्त्यै च ये पूजयन्ति दीक्षाविधिविवर्जिताः ॥
षाण्मासात्पतनं यान्ति ते वै देवलकाः स्मृताः ।
त्रीणि वर्षाणि वृत्त्यर्थं स्थिरलिङ्गेषु दीक्षितः ॥
पूजयेद्यादि विप्रस्तु स वै देवलकः स्मृतः ।

शैवरत्नाकरे -

अदीक्षितश्च यो विप्रश्चतुर्वेदपरोऽपि वा ।
संस्पर्शेद्यदि वा लिङ्गं श्वानो वा स्पृशिते यदि ॥
अदीक्षितश्च यो विप्रः कुर्याल्लिङ्गस्य पूजनम् ।
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥
चतुर्वेदेष्वहङ्कारी शिवलिङ्गं तु पूजयेत् ।
राजराष्ट्रा विनश्यन्ति तस्य ग्रामो विनश्यति ॥
योऽर्चयेत् मन्त्रपूर्वं तु सर्वे देवलकः स्मृतः ।

In Public domain. Digitization Muthulakshmi Research Academy

योगजे —

अदीक्षितश्चतुर्वेदी परार्थपूजां न कारयेत् ।

सन्ताने -

अदीक्षितोऽपि यो विप्रः षाण्मासं तु शिवं स्पृशेत् ।
सोऽपि देवलकः प्रोक्तो सनार्हो देवपूजने ॥
दीक्षितश्चापि यो विप्रो वृत्त्यर्थं वत्सरत्रयम् ।
पूजयेद्यदि देवेशं सोऽपि देवलको भवेत् ॥

मकुटे -

विप्रक्षत्त्रियविट्शूद्रा दीक्षिताश्च प्रवेशकाः ।
आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ॥

अंशुमति -

विप्रक्षत्त्रियवैश्याश्च शूद्राश्चैव तु दीक्षिताः ।
आत्मार्थयजनं ~~कुर्यात्~~ कुर्युर्न कुर्युस्तु परार्थकम् ॥
चातुर्वर्णोद्भव . णामर्चनं तु विशेषतः ।

कामिके -

शिवाय शिवविप्रेभ्यो दद्याद्गां दक्षिणान्विताम् ।
दशनिष्कं तदर्धं वा तदर्धं निष्कमेव वा ॥

तत्रैव| परार्थयजनं कार्यं शिवविप्रेण नित्यशः ।
धार्मिकः कथ्यते नित्यमादिशैवो द्विजोत्तमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अन्येषां स्वार्थमेवं स्यात् कुर्युश्चेत्कर्तृनाशनम् ।
शिवसृष्टिं विना ये तु जायन्ते ब्रह्मणो मुखात् ॥
ते सामान्या न तेषां तु परार्थेष्वाधिकारिता ।
यदि मोहेन कुर्वीरन् राज्ञो राष्ट्रस्य नाशनम् ॥

तत्रैव -

तस्मात्परार्थमात्मार्थं . . पनं . . पनं तथा ।
शिवविप्रेण कर्तव्यमन्येषां ~~स्व~~ स्वार्थमेव हि ॥
परार्थमपि कुर्याच्चेल्लोभेन नृपतेस्तदा ।
तद्राष्ट्रस्य विनाशः स्यादाचिरेण न संशयः ॥

तत्रैव -

विपरीतक्रियां दृष्ट्वाप्यौदासीन्यात् करोति यः ।
स राजा क्षयमाप्नोति नात्र कार्या विचारणा ॥
तस्मादाचार्यवर्येण पञ्चगोचरवर्तिना ।
शैवागमपरिज्ञानपारगेण क्रियावता ॥
क्रिया निर्वर्त्यमाना स्यात् स्वस्वराष्ट्राभिवृद्धये ।

तत्रैव -

शान्तिकं पौष्टिकं कर्म कार्यं राज्ञां विशेषतः ।
अन्येषामपि सर्वेषामाभिचारादिकं तु वा ॥

In Public domain. Digitization Muthulakshmi Research Academy

विधेयं धर्मानुष्ठेन सान्तानिकपरेण तु ।
तेनैवानुष्ठितं कर्म कामदं सर्वदा नृणाम् ॥

तत्रैव –

आदिशैवेन कर्तव्या न चान्यैश्च विशेषतः ।
अन्यश्चैव कृता चेत्तु निष्फला सा भवेत्तथा ॥

तत्रैव –

आदिशैवस्य कर्तव्यमात्मार्थं च परार्थकम् ।
स्थापनं यजनं चैव आदिशैवार्हकं भवेत् ॥
अन्येन यत् कृतं कर्म आभिचारमिति स्मृतम् ।

तत्रैव –

आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनान्तकम् ।
अन्यथा कारयेद्यस्तु निष्फलं तदवाप्नुयात् ॥

सुप्रभेदे –

चर्यापादे तु यन्नोक्तं सामान्यश्चैतवच्चरेत् ।
तच्च बोधायने सूत्रे दृष्ट्वा कर्म समाचरेत् ॥
तस्माद्बोधायनेनोक्तं तेषां सूत्रमुदीरितम् ।
आदिशैवा इमे प्रोक्ताः संक्षेपान्न तु विस्तरात् ॥

योगजे –

आदिशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।

In Public domain. Digitization Muthulakshmi Research Academy

देशिकः साधकश्चैव तस्य पर्यायवाचकाः ।
आद्यावेव तु शैवत्वादादिशैव इति स्मृतः ॥
शिवेन दीक्षितत्वाच्च शिवब्राह्मण उच्यते ।
सर्वेषां तु गुरुत्वाच्च गुरुरित्यभिधीयते ॥
देश आदिश्यते येन स देशिक इति स्मृतः ।
लिङ्गस्थापनयोग्यत्वात् स्थापको नाम कीर्तितः ॥

तत्रैव -

आदिशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।
आदिशैवेन दीक्ष्याः स्युर्महाशैवा न शैवकाः ॥
महाशैवं तु विप्राणां नृपाणामनुशैवकम् ।
वैश्यानां भोगशैवं चान्तरशैवं तु शूद्रकम् ॥
आदिशैवादिशैवानामादिशैवो गुरुर्भवेत् ।

कामिके -

आदिशैवकुले जातः श्रेष्ठः स्यात् स्थापनादिषु ।
विप्रादयश्चतुर्वर्णा अपि यो . . . कर्मणि ॥
दीक्षायां सर्वमर्त्यानां प्रतिष्ठा परमथोत्सवे ।
स्नपने प्रोक्षणेऽन्यत्र प्रायश्चित्तेऽभिषेचने ॥
व्याख्यानादौ च युक्तः स्यात् स्वार्थे ~~वार्थे~~ वाथ परार्थके
सर्वदेवार्चने चैव आदिशैवो गुरुर्मतः ॥

In Public domain. Digitization Muthulakshmi Research Academy

मकुटे ~~म~~ —
(पा)

चतुर्वर्ण्यस्य दीक्षायां विशेषब्राह्मणो गुरुः ।
विप्रक्षत्रियविट्शूद्रा दीक्षिताश्च प्रवेशकाः ॥
आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ।
ऊर्ध्वशैवेन कर्तव्यमात्मार्थं च परार्थकम् ॥
ऊर्ध्वशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।

कारणे-

पञ्चशैवाः समाख्याताः सिद्धान्ते तु प्रजापते ।
प्रथमोऽनादिशैवः स्यात् स शैवस्तु सदाशिवः ॥
आदिशैवो द्वितीयस्तु शिवश्वेतः स उच्यते ।
आदौ सदाशिवेनैव दीक्षितस्त्वादिशैवकः ॥
कौशिकः काश्यपश्चैव भरद्वाजोऽथ गौतमः ।
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ॥
कौशिकः शिवमूर्त्या तु दीक्षितः शिवगोचरः ।
काश्यपस्त्वीश्वरेणैव शिवागोचरसंस्थितः ॥
ईशानेन भरद्वाजो दीक्षितो ज्योतिगोचरः ।
गौतमो ब्रह्ममूर्त्या तु सावित्री गोचरः स्मृतः ॥
अगस्त्यश्चोर्ध्ववक्त्रेण दीक्षितो व्योमगोचरः ।
ऋषीणां चैव पञ्चानां गोचरत्वं प्रकीर्तितम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

आदिशैवा इमे प्रोक्ता गोचरं कुलमुच्यते ।
कुलेष्वेतेषु सञ्जाता स्थापनादिक्रियार्हकाः ॥
सदा प्रवर्तकास्त्वेते आदिशैवा इति स्मृताः ।
तृतीयस्तु महाशैवः स शैवो विप्र उच्यते ॥
चतुर्थमनुशैवं च नृपवैश्यौ तु तौ स्मृतौ ।
पञ्चमोऽन्तरशैवस्तु स शूद्रश्चेति कथ्यते ॥
शिवस्त्वनाश्रितः प्रोक्त आदिशैवस्तमाश्रितः ।
आदिशैवाश्रिताः प्रोक्ता महाशैवानुशैवकाः ॥

1586. स्वायम्भुवे -

सिद्धान्तेषु समाख्याता पञ्चशैवाश्चतुर्मुख ।
अनादिशैवः प्रथमो ह्यादिशैवो द्वितीयकः ॥
तृतीयस्तु महाशैवश्चतुर्थश्चानुशैवकः ।
कृष्णस्त्वान्तरशैवः स्यात् प्रोच्यते तेऽधुना क्रमात् ॥
स शिवो नाश्रितः प्रोक्तश्चादिशैवस्तमाश्रितः ।
अनाद्याद्यादिशैवाश्च दीक्षितास्त्वादिशैवकाः ॥
महाशैवादयस्त्वन्ये ते विप्राद्याः प्रवेशकाः ।
प्राप्ता प्रविश्य यस्मात्तु शिवतां चतुराननः ॥
तस्मात् प्रवेशकेत्युक्ताश्चाम्रलेपनवाम्रवत् ।
प्रवेशकेति नामापि सामान्यं तेषु पद्मज ॥

In Public domain. Digitization Muthulakshmi Research Academy

सुप्रभेदे -

मर्त्यानां मलनाशाय तेषां मुक्त्यर्थमेव च ।
परार्थे पूजनार्थाय परेषां शोधनाय च ॥
स्थापनप्रोक्षणं दीक्षाविधानकरणाय च ।
ये शिवान्निर्मितास्तेन शिवेन परमात्मना (:) ॥
ते शैवा ब्रह्मवक्त्राच्च मर्त्यलोकं गता क्रमात् ।
काश्यपादिकनामैश्च ऋषिरूपैश्च कीर्तिताः ॥
आदौ शिवत्वमस्तीति आदिशैवा उदीरिताः ।
शिवेन दीक्षिताः श्वेतास्ते शिवब्राह्मणाः स्मृताः ॥
सद्योमाः परमाचार्याः विप्रोत्तमशिवोत्तमाः ।
द्विजोत्तमोत्तमाश्चैव शिवः श्वेताः शिवात्मजाः ॥
तेषां पर्यायनामानि संक्षेपात् कथितानि ते ।

तत्रैव -

अनुशैवांस्तु वक्ष्येऽहं दीक्षिताः ब्राह्मणास्त्विमे ।
अनुशैवाः क्रमेणोक्ता अन्तराश्च ततः श्रृणु ॥
क्षत्त्रियाद्यास्त्रयो वर्णाः शैवास्तेऽन्तरसंज्ञकाः ।
आदिशैवानुशैवैर्वा दीक्षा संपद्यते क्रमात् ॥
एवमन्तरशैवानां लक्षणं च समासतः ।
तेषामन्तरशैवानामनुशैवो गुरुर्भवेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

तेषां चैवानुशैवानामादिशैवो गुरुर्भवेत् ।
सर्वेषां गुरुरित्युक्तः शिवः श्वेतः शिवात्मकः ॥
पूर्वं ब्रह्ममुखेष्वेव श्वेत समुद्भवः ।
ततः श्वेताः समुत्पन्नाः सामान्यश्वेतकाः स्मृताः ॥
शिवसृष्ट्या समुद्भूता ब्रह्मवक्त्रचतुष्टयात् ।
ये भूमौ ब्राह्मणा जातास्ते शिवब्राह्मणाः स्मृताः ॥
शिवसृष्ट्या विना यस्माज्जायन्ते केवलं मुखात् ।
सामान्यब्राह्मणांस्तांस्तु दीक्षया प्रापयेच्छिवम् ॥

तत्रैव -

ततस्तु दीक्षितान् शिष्यान् ब्राह्मणादिक्रमेण तु ।
आचार्यलक्षणोपेतः शिवसिद्धान्तवत् सुधीः ॥
आदिशैवः सुसंसृष्टः सर्वेषां च गुरूत्तमः ।

वीरागमे -

विप्रक्षत्रियविट्शूद्रा दीक्षिताश्चापि देशिकैः ।
आत्मार्थयजनं कुर्योन्न कर्तव्यं परार्थकम् ॥

कारणे -

महाशैवानुशैवाश्च तथैवान्तरशैवकाः ।
आत्मार्थयजनं कुर्युर्न कुर्युर्न कुर्युस्तु परार्थकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

सुप्रभेदे -

दीक्षितानां द्विजादीनामात्मार्थमनुलोमिनाम् ।
परार्थमादिशैवानामात्मार्थं च समर्चनम् ॥

तत्रैव -

अथातः संप्रवक्ष्यामि आचार्यस्य तु लक्षणम् ।
फलपाकविधिं ज्ञात्वा शिवभक्तिर्भवेद्यदा ॥
. . प्रवर्तते पुंसां लिङ्गसंस्थापने रतिः ।
आचार्यं पूर्वमन्विच्छेन्मूर्तिपांस्तदनन्तरम् ॥
आदिशैवकुलोद्भूतः पञ्चगोत्रसंस्थितः ।
सर्वशास्त्रार्थतत्त्वज्ञः शिवज्ञानविशारदः ॥
ईदृग्भूतस्तु यो विद्वान् स्थापनादीन कारयेत् ।
स एव स्थापको वत्स नेतरः सर्वथा विभोः ॥
अनुशैवादिभिर्नैव स्थापनादीन कारयेत् ।
कर्मिणामादिशैवस्य कर्तव्यं स्थापनादिकम् ॥
अन्यथा तु कृते राज्ञस्त्वभिचारकमेव तत् ।
न तद्गृह्णीत देवेशो न फलं जायते यतः ॥

तत्रैव -

आदिशैवाङ्कैर्युक्तान् विधिज्ञान् मन्त्रसंयुतान् ।
शिवव्रतधरान् मुख्यान् शैववेदविशारदान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

शतमष्टोत्तरं चापि आदिशैवान् प्रगृह्य च ।
स्थापनादिक्रियाः सर्वास्त्वादिशैवेन कारयेत् ॥

कामिके –
दीक्षामाज्ञां च सर्वेषां कारयेद्विधिचोदितः ।
गुरुर्मूर्तिधरैः सार्धं होमकर्म समारभेत् ॥
पूर्वोक्तभूषणोपेतस्त्वादिशैवकुलोद्भवः ।

तत्रैव गौरीकल्याणपटले –
शिवद्विजकुलोद्भूतः समधीतशिवागमः ।
सोष्णीषश्चोत्तरीयश्च धृतः सर्वाङ्गलक्षणः ॥
ध्यात्वोद्धृत्योदकं दद्यात् कराभ्यां करकेण च ।

तत्रैव शताभिषेकपटले –
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं चैव मयापि वा ।
अनुलोमसमुद्भूतं विशेषात् भूपतिं द्विजाः ॥
राजस्त्रियं वा सामन्तममात्यं वा पुरोहितम् ।
तत्तज्जातिसमुद्भूतां स्त्रियं वा शिवविप्रजः ॥
पञ्चाङ्गभूषणोपेतस्त्वभिषेकं समाचरेत् ।

तत्रैव –
स्नात्वा समाप्य सन्ध्याद्याः कृतनित्यो गुरूत्तमः ।
पञ्चगोचरसंजातः सोष्णीषः सोत्तरीयकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चाङ्गभूषणोपेतो द. णो हृष्टमानसः ।

तत्रैव नैमित्तिकपूजापटले –

~~ब्राह्मणं क्षत्रियं वैश्यं~~

उपयुक्तं महद्द्रव्यं यागे स्वर्णाम्बरादिकम् ।

आचार्यायैव दातव्यं . . गोचरवर्तिने ।

स्वायम्भुवे –

योगपूजाविधानज्ञः शिवद्विजकुलोद्भवः ।

पूजां कृत्वा तु विधिवन्नटेशस्य विशेषतः ॥

सुप्रभेदे –

आचार्ये आदिशैवस्तु सकलीकृतविग्रहः ।

पुण्याहं वाचयित्वा तु प्रोक्षयेत् पञ्चगव्यकैः ॥

कर्षयेच्छिवमन्त्रेण प्रागुदक्प्रवणान्महीम् ।

कामिके –

यस्य राज्ञः शिवज्ञानव्याख्यानं वर्तते द्विजाः ।

तद्राष्ट्रं वर्धते नित्यं स नराधिप ऊर्जितः ॥

राजराजगुरुत्वे च सेनापत्येऽन्यकर्मणि ।

पुरोहितत्वे सर्वस्य राजकार्यस्य दर्शने ॥

शुद्धशैवो भवेद्योग्यः स चेत् शान्तानिकेश्वरः ।

In Public domain. Digitization Muthulakshmi Research Academy

तत्रैव –

सृष्ट्यनन्तरकाले ये दीक्षिताः कौशिकादयः ।
शिवेन तत्कुलोत्थाः स्युः शैवाः सन्तानिका द्विजाः ॥
सान्तानिकाश्च विज्ञेयाः सर्वानुग्राहका मताः ।
जीर्णोद्धारे पर्योत्सवे वा तद्वियुक्तास्तु वा मताः ॥
शिवद्विजकुलोत्था ये ते वै माहेश्वरा जनाः ।

वीरतन्त्रे –

शिवद्विजास्तु विप्रेन्द्रा आदिशैवा इति स्मृताः ।
159a कश्यपः काश्यपश्चैव भारद्वाजोऽत्रिरेव च ॥
गौतमश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
तेषामृषीणां विप्रेन्द्र जातानां च पुनः पुनः ॥
शिवद्विजानां दीक्षादौ - - . . . . . ।
मदर्चनार्थं तेषां च दीक्षा शुद्ध्यर्थमिष्यते ॥

कामिके –

उत्सवाद्यङ्गक्लृप्तं च देवतावाहनादिकम् ।
तत्काले मूललिङ्गादिपूजनं नित्यहोमकम् ॥
अनेकनरनिर्वर्त्यं कथमेकः करोत्यहो ।
. . . महाप्राज्ञाः समाधिं कथयाम्यहम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

नित्यनैमित्तिके काम्ये यत्कर्मैकालयस्थितम् ।
दाकाचार्येण कर्तव्यमिति साधूदितं मया ॥
देशिकस्यास्य पुत्रो वा पौत्रो वा तस्य बान्धवः ।
तद्दीक्षितास्तदादेशभया विप्रा . . नराः ॥
आदिशैवकुले जाताः ब्राह्मणः क्षत्रिया विशः ।
शूद्रा येऽनुलोमास्ते गन्धर्वा नर्तकादयः ॥
शूद्रकन्याश्च मद्दारस्यस्तदाज्ञापालका यदि ।
तैरप्यनुष्ठितं कर्म देशिकानुष्ठितं भवेत् ॥

सूक्ष्मे -

आदिशैवेन कर्तव्यं प्रतिष्ठास्थापनादिकम् ।
अनुशैवादयः सर्वे आत्मार्थविषये क्रमात् ॥
समयीपुत्रकश्चैव साधको मूर्तिधारकः ।
गुरोराज्ञावशात् कुर्याद्देशान्तरगतो यदि ॥

योगजे -

भवेत् कर्मान्तरे विघ्न आचार्येऽप्यगुणे यदि ।
तस्य पुत्रेण शिष्येण कर्तव्यं तदनुज्ञया ॥

कारणे -

गुरुणाकरणस्यैव विरोधे सति तत्र तु ।
सा क्रिया तस्य शिष्येण कर्तव्या तेन शास्त्रतः ॥

In Public domain. Digitization Muthulakshmi Research Academy

कामिके -

शिवाश्रितस्य तन्त्रोक्तं ब्राह्मणस्य शिवागमे ।
क्षत्रियादित्रयाणां च नार्चनं तु परार्थकम् ॥

कामिके -

तस्मात्परार्थमात्मार्थमात्मार्थस्नपनं तथा ।
शिवविप्रेण कर्तव्यमन्येषां स्वार्थमेव हि ॥
परार्थमपि कुर्याच्चेल्लोपेन नृपतेस्तदा ।
तद्राष्ट्रस्य विनाशः स्यादचिरेण न संशयः ॥

वीरतन्त्रे -

आदिशैवकुले जातः स वै देशिक उच्यते ।
आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनान्तकम् ॥
अन्यथा कारयेद्यस्तु अभिचाराय चैव हि ।

तत्रैव -

तेषामृषीणां वंशेषु जाता ये तु शिवद्विजाः ।
पुनर्दीक्षां न कुर्वन्ति कर्तव्यां . . . तु निष्फला ॥

कारणे -

उत्सवं कारयेत्पक्षाद्यावत्सप्तदिनावधि ।
एकाहमुत्सवं वापि कारयेद्देशिकोत्तमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

आरम्भादन्तमेवं तु एकदेशिकता भवेत् ।
आचार्यस्य अभावे तु मूर्तिपेन तु कारयेत् ॥
यागोपकरणं सर्वं देशिकाय प्रदापयेत् ।

अन्यत्र -

आदिशैवान्वयोद्भूतः शिवदीक्षाभिषिक्तकः ।
पञ्चगोत्रसम्भूतः शैवानुष्ठानतत्परः ॥
ईदृशं गुरुमासाद्य प्रणयेत् स्थापनादिकम् ।
मूर्तिपास्ताद्दशाः प्रोक्तास्त्वानयेद्धोमकर्मणि ॥

कामिके -

सिद्धान्तशास्त्रतश्चैव शिवविप्रैर्यथाक्रमम् ।
शास्त्रान्तरैश्च यत्स्थाप्य लिङ्गं तदुभयात्मकम् ॥
पूजनीयं नृपग्रामयजमानाभिवृद्धये ।
शैवः सर्वाधिकारी स्यात् स्वकीये च परत्र च ॥
शैवाः सर्वेषु . . न्ति ये गृहस्था द्विजोत्तमाः ।
यामले मान्त्रतन्त्रे च कापाले पाञ्चरात्रके ॥
बौद्धे वा चार्हते चैव लागुडे वैदिकेऽपि च ।
अन्येष्वपि च मार्गेषु तत्तच्छास्त्रोक्तमार्गतः ॥
शैवाः कुर्वन्ति दीक्षाद्यं तल्लिङ्गस्थापनादिकम् ।

तदेवं सान्तानिकशिवद्विजाः सर्ववर्णपूज्यानां ब्राह्मणानां

In Public domain. Digitization Muthulakshmi Research Academy

च परार्थपूजानिषेधवचनानि प्रदर्शितानि । तथापि क्वचित्तु सुप्रभेदाजितागमादिके ~~शैवम्~~ कथञ्चिद्भक्तिप्रकर्षाकृष्टविधये शिवदीक्षितानां महाशैवानां परार्थपूजा प्रतिपादिता ।

यथा सुप्रभेदे –

दीक्षया प्रापिता यस्मादनुशैवास्तु कीर्तिता

इत्युपक्रम्य

स्वार्थं वा तु परार्थं वा पूजयेत्तु विशेषतः ।

अजिते –

शिवाश्रितस्य तत्प्रोक्तं ब्राह्मणस्य शिवागमे ।
क्षत्रियादित्रयाणां च नार्चनं तु परार्थकम् ॥

हालास्यमाहात्म्ये –

दीक्षाविहीना विप्राश्च महालिङ्गस्य तस्य तु ।
अर्चनायामनर्हाश्च क्षत्रियाश्चापि दीक्षिताः ॥
ते सर्वे कारयामासुरन्यैरन्यैस्तु भूसुरैः ।

अन्यत्र –

तन्मध्ये वै पुनर्दीक्षां शैवमासाद्य पूजकाः ।
कर्तुमात्मपरार्थं ते पूजामर्हन्ति वै द्विजा इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

ततोऽयमत्र विवेकः।

वैदिकी शैवी चेति पूजा द्वेधा। तत्र शैवी परार्थपूजा वैदिकेषूक्ता यद्यपि प्रोक्तप्रकारेण परिपाकदीक्षामुमुक्षुविषयाप्यर्चना शिवदीक्षितानामेव महर्षिमहाशैवानां केवलं वैदिकी परार्थपूजा च। केवलं वैदिकानां बोधायनसूत्रोक्तप्रकारेण कर्तव्या यद्यपि शिवागमोक्तशिवदीक्षाविधुरत्वेनादीक्षितानां वैदिकपाशुपतादिषूक्तप्रकारेण कथञ्चिच्छिवदीक्षितानामेव। सर्वथा नादीक्षितानां कर्षणादिप्रतिष्ठोत्सवादिप्रायश्चित्तान्तकर्मणां शिवागमसापेक्षत्वेनादीक्षितानां शिवागमेऽनधिकारात्। तत्सापेक्षत्वं च वेदोपबृंहणे सूतसंहितादिपुराणे प्रोक्तम्।

आगमेनैव शास्त्रेण प्रोक्तलक्षणलक्षितम्।
आदावश्रद्धया विप्राः शिवलिङ्गं समाहिताः॥

ब्रह्मोत्तरखण्डे -

आगमोक्तेन विधिना पीठमामन्त्रयेत् सुधीः।

स्मृतौ च -

केचिद्वेदविदश्चापि तान्त्रिकेणाध्वना सुरान्।
अभ्यर्च्य सिद्धिमायान्ति काङ्क्षन्तश्च ततः फलम्॥

In Public domain. Digitization Muthulakshmi Research Academy

तथैव वैदिकपरार्थमीमांसायां श्रीमदापदुद्धारणदीक्षितै-
रपि शिवागमशिवदीक्षासापेक्षत्वं सूचितम् । प्रधान-
प्रकृष्टकर्माधिकारिभिः साकल्येन प्रवृत्ते सत्यप्रधानेन
तथाभूतं कर्म न कार्यस्तथा कृतं कर्मप्रोक्तसर्वदोषकृत्तथा
151-b मीमांसान्यायाच्च पूजासु शिवतान्त्रिकीपूजा मुख्या । तत्र
मुख्याधिकारिणां शिवब्राह्मणानामभावे वैदिकेन वैदिकीं
शिवपूजां कथञ्चिद्राजा कारयेत् । वैदिकपरार्थपूजाप्रकार-
श्च पौराणिकः प्रोल्लिख्यते ।

कलिदोषेण मर्त्यानां महामोहो भविष्यति ।
वेदमार्गरतिः श्रद्धा न भविष्यति सर्वथा ॥
वेदबाह्येषु मार्गेषु श्रद्धां कुर्वन्ति सन्ततम् ।
अल्पायुषो भविष्यन्ति दरिद्राश्च विशेषतः ॥
आधिव्याध्यस्त्रशस्त्राग्नौर्यप्रचोरादिभिस्तथा ।
त्यक्तवर्णाश्रमाचारा नष्टोपायविशेषतः ॥
भूयो भूयो भविष्यन्ति विवशात् सर्वयोनिषु ।
मामुक्तलक्षणं साम्बं राजराष्ट्रविवर्धये ॥
प्रतिष्ठाप्य नदीतीरे प्रणवेनैव केवलम् ।
गन्धपुष्पादिभिर्दिव्यैः सार्वभौमो भवेद्ध्रुवम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

विचित्रमालयं कुर्यात् प्राकारैर्गोपुरैर्युतम् ।
नृत्तगीतादिकं दद्यात् त्रिसन्ध्यं शुद्धमोदनम् ॥
षण्मुखं वायुकोणे च नैरृते च विनायकम् ।
स्थापयित्वार्चयेन्नित्यं राजराष्ट्राभिवृद्धये ॥
द्विजैराराधनं कार्यं राजराष्ट्राभिवृद्धये ।
राजा विजयमाप्नोति तत्रैव मम पूजनात् ॥
आयुरारोग्यसम्पन्नो भवेन्मुक्तो भविष्यति ।
शत्रवश्च विनश्यन्ति देवि राज्ञो न संशयः ॥
धनधान्यसमृद्धं स्यात् राष्ट्रं सर्वत्र सर्वदा ।
काले कालेऽभिवृद्धिः स्यात् सर्वत्र मम पूजया ॥
वर्णाश्रमसमाचारनिरताः सर्वमानवाः ।
भविष्यन्ति न सन्देहस्तत्र मामर्चयेत्ततः ॥ इति ।

तदेवं शिवब्राह्मणव्यतिरिक्तब्राह्मणानामपि कथञ्चित्परार्थ-पूजा भाषितापि गौणवृत्त्येति मन्तव्या ।

इति शैवाचार्यमाहात्म्यं समाप्तम् ॥

अथ चतुर्वर्णशैवाचार्यविधिरुच्यते । तदुक्तं शैवपुराणे —
शिवशास्त्रसमायुक्ताः परशास्त्रपराङ्मुखाः ।
ब्राह्मणादिचतुर्वर्णा आचार्यास्तु प्रकीर्तिताः ॥

In Public domain. Digitization Muthulakshmi Research Academy

कामिके -

स्वार्थेऽष्टौ चललिङ्गस्य प्रतिष्ठायां त्रयस्त्विमे ।
शूद्रोऽपि शूद्रदीक्षायां स्वार्थे च चलसंज्ञक इति ॥

सुप्रभेदे -

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धकुलोद्भवाः ।
आचार्यास्ते तु विज्ञेया नान्येषां तु कदाचनेति ॥

तत्रैव जातिनिर्णये -

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव प्रकीर्तिताः ।
एतेषां चातुर्वर्णानामाचार्यत्वं नियोजयेदिति ॥

सर्वज्ञानोत्तरे -

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धास्तु साधकाः ।
स्ववर्णादानुपूर्व्येण आचार्याश्च षडाननेति ॥

चिन्त्यविश्वे -

विप्रादिषु चतुर्ष्वेवमनुलोमादि षट्सु च ।
एतेषां दशजातीनामाचार्यत्वं विधीयत इति ।
सर्ववर्णानतो विप्रः क्षत्त्रियस्त्रितयं गुरुः ।
वैश्यशूद्रौ द्वयं चैकं दीक्षयेद् दक्क्रियार्थवित् ॥
ब्राह्मणः सर्वजातीनां सदानुग्राहकः स्मृतः ।
स्वजातिपूर्वमाचार्यास्त्रयः शेषा नृपादय इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

तथा षट्सहस्रिकायां -

चतुर्णामपि वर्णानामाचार्यत्वमिहोदितम् ।
ब्राह्मणादिचतुष्कस्य द्विजोऽनुग्राहकृन्मतः ॥
त्रयाणां क्षत्रियो द्वाभ्यां वैश्यः शूद्रस्त्वयोनिजे ।
एवं चानुग्रहः कार्यश्चतुर्भिरपि देशिकैरिति ॥

किरणे गरुडः -

मध्ये वर्णचतुष्कस्य गुरुत्वं कस्यचिद्दद ।

ईश्वरः -

चतुर्णामपि वर्णानामाचार्यत्वमिहोदितम् ।
ब्राह्मणादिचतुष्कस्य द्विजोऽनुग्राहकृ न्मतः ~~न्मतः~~ ॥
त्रयाणां क्षत्रियो द्वाभ्यां वैश्यः शूद्रस्त्वयोनिज । इति
~~एवं चानुग्रहः कार्यश्चतुर्भिरपि देशिकैरिति~~ ॥

पुनः कामिके च -

नित्यादित्रितयं कार्यं चतुर्भिरथ (or वि) चारतः ।
वैश्वदेवं तथा सन्ध्यां शूद्रस्त्यक्त्वातममयीमिति ॥

कालोत्तरे -

अभिषिक्तोऽयमेवं हि ब्राह्मणः क्षत्रियोऽथवा ।
वैश्यो वाप्यथ शूद्रो वा प्रतिष्ठाद्यधिकारिणः ॥

ननु चतुर्थविषयगुरुत्वप्रतिपादकप्रदर्शवचनानां

In Public domain. Digitization Muthulakshmi Research Academy

नैष्ठिकशूद्रविषयत्वमस्तु । न तु गृहस्थविषयत्वम् ।
तदुक्तं कामिके –

शूद्रोऽपि शूद्रदीक्षायां स्वार्थे च चलसंज्ञके ।
बाणलिङ्गे क्षणे वापि स्थापको यदि नैष्ठिकः ॥
शूद्रस्यापि गृहस्थस्य नित्येऽष्टावेव योग्यता ।
अभिषेकेऽप्ययोग्योऽयं किं पुनः स्थापनादिष्विति ॥
सत्यं श्रोतुरभिप्रेताधीनमिदं वचनं क्वाचित्कम् ।

अन्यथापि भूयासामिति न्यायादपार्थकमेव । तथा च वाक्यविदः – विप्रतिषिद्धधर्मे समवाये भूयसां स्यात् ।

सधर्मत्वं लौकिके –

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजे–

दित्यादि पुराणविप्रतिपत्तिपरिहारे तत्र भवता स्कान्द-शतेनाप्युक्तोऽयं न्यायः आर्षेण वा विप्रतिषिद्धं मार्षं संयुक्तेन नेतव्यं युज्यमानं नेतव्यमल्पं बहुना तथैव सतां प्रवृत्त्या पथिकेन चान्यदिति । शूद्रगृहस्थानां गुरुत्वं सिद्धमेव । नैष्ठिकस्त्वधमो ज्ञेय इत्यादि नैष्ठिकस्याधमत्ववचनमप्युक्तन्यायेन

In Public domain. Digitization Muthulakshmi Research Academy

परिहरणीयः। तदुक्तं पराख्ये -

गृहस्थः सर्ववर्णेषु श्रेष्ठो गुरुरुदाहृतः।
नैष्ठिकस्त्वधमो ज्ञेयो भौतिकस्तु विशेषत इति॥

कालोत्तरे -

चतुर्णामपि वर्णानां लिङ्गिनां गृहिणामपि।
आचार्यत्वं शिवेनास्मिन् सिद्धान्ते प्रतिपादितमिति

उत्तरकामिके -

चातुर्वर्ण्यगृहस्थानामाचार्यत्वं विशेषतः।
अथवा ब्रह्मचारीणामाचार्यत्वं विशेषत इति॥

षट्सहस्त्रिकायां -

शृणु षण्मुख तत्त्वेन भोगमोक्षौ यथास्थितौ।
ब्रह्मचारी गृहस्थश्च द्विविधो देशिकोत्तमः॥
दीक्षाप्रतिष्ठयोरेतौ उभावप्यधिकारिणौ।
किं तु मोक्षैकयुक्तानां विभूतिविमुखात्मनाम्॥
ब्रह्मचारी गुरुर्ज्ञेयो गृहस्थश्चोभयात्मनाम्।
गृहस्थादितरेषां तु नास्ति भोगाधिकारिता॥
न .. गणी गुरुः कार्यो भोगमोक्षोभयार्थिभिरिति।

तथा सन्ताने -

गृहस्थश्चोत्तमो विद्यात् ब्रह्मचार्यधमो भवेदिति।

In Public domain. Digitization Muthulakshmi Research Academy

सुप्रभेदे -

गृहस्थश्चोत्तमो ज्ञेयो भौतिकब्रह्मचार्यपीति ।

वीरतन्त्रे -

... त्तमं विद्यादथवा ब्रह्मचारिणः ।

सान्तानिकगृही श्रेष्ठो गृहस्थस्तदभावतः ॥

भौतिको ब्रह्मचारी वा देशिको गृहमेधिनाम् ।

६०७ नैष्ठिको नैष्ठि .. स्यात् भुक्तौ मुक्तौ क्रमान्मत इति ।

किरणे -

सान्तानिको गुरुः प्रोक्तो गृहस्थो देशिकोत्तमः ।

गृहस्थं चोत्तमं विद्यात् अथवा ब्रह्मचारिणम् ॥

गृहस्थो देशिकः श्रेष्ठो भोगमोक्षप्रसिद्धय इति ।

कामिके -

सृष्ट्यनन्तरकाले ये दीक्षिताः कौशिकादयः ।

शिवेन तत्कुलोत्थाः स्युः शैवाः सान्तानिका द्विजाः ॥

सान्तानिकगुरुः श्रेष्ठो गृहस्थस्तदभावतः ।

भौतिको ब्रह्मचारी वा देशिको गृहमेधिनाम् ॥

नैष्ठिको नैष्ठिकेषु स्यात् भुक्तिमुक्तिक्रमान्मतः ।

भुक्तिमुक्तिप्रसिद्ध्यर्थं गृहस्थो गुरुरिष्यते ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्रैव -

महापुरस्य सौम्यायामभिषिञ्चेद्द्विजानथ ।
पूर्वायां क्षत्रियान् ब्रह्मन् वैश्यान् दिशि यमस्य तु ॥
शूद्रांस्तु पश्चिमाशायां सर्वान् वा . . . न् स्थितानिति ।
सर्वलक्षणहीनोऽपि ज्ञानवान् गुरुरिष्यते ॥
वर्णावर्णविचारो यः स नरः पातकी भवेदिति ॥

इति चातुर्वर्णशैवाचार्यमाहात्म्यं

समाप्तम् ॥

॥ चातुर्वर्णसन्यासविधिः ॥

चिन्त्यविश्वे —

यतयस्त्रिविधा ज्ञेयास्तपस्वी विदुषस्तथा ।
विद्वानिति त्रिधा प्रोक्तास्तेषां लक्षणमुच्यते ॥
तपोनिष्ठस्तपस्वीति तस्य वृत्तिस्तु सुव्रत ।
नाध्येतव्यं न संकल्पो न श्रोतव्यं कदाचन ॥
शिष्याणां संग्रहं चैव नैव विद्याप्रकाशकः ।
न वदेत् संस्कृतां भाषां न दण्डी न कमण्डलुः ॥
लिङ्गमष्टकमभ्यर्च्य भक्तिमात्रेण संयुतः ।
एकाकी वृक्षमूले वा वने वा जनवर्जिते ॥

In Public domain. Digitization Muthulakshmi Research Academy

जनाद्भीतिसमायुक्तो वसेद्ग्रामप्रधानकः ।
वसनं येन केनापि तथैवाशनपानकम् ॥
पाणिपात्रोदरोपानो याचितान्नेन जीवनम् ।
इत्युक्तस्तु तपस्वी स्यात् साधको याति नामवान् ॥
विदुषोऽस्य यतेर्वापि वर्तनं नन्दिकेश्वर ।
अध्यापनं चाध्ययनं श्रवणं चिन्तनं तथा ॥
एतच्चतुष्टयं तस्य विदुषोऽस्य विशेषतः ।
विद्यतेर्विशेषोऽस्ति व्याख्यानं चिन्तनं भवेत् ॥
सदाचार्याभिषेकेण युक्तो विद्वत्समाश्रयकः ।
यतीनां त्रिविधं प्रोक्तं शैवानां चतुराश्रमे ॥
आश्रमाणां च भेदोऽस्ति निष्ठाभेदो न विद्यते ।
कष्टयं फलं भुङ्क्ते मोक्षः साधारणस्तयोः ॥

सूतसंहितायां किरणादिके च भङ्ग्यन्तरेण नामानि वृत्तानि खननदहनव्यवस्थादीनि च द्रष्टव्यानि ।

सुप्रभेदे –

ब्राह्मणादिचतुर्वर्णाः काश्यपादिसमुद्भवाः ।
परमेशप्रसादेन अधिकारे नियोजिताः ॥
गोचरं गोत्रसूत्रं च संक्षेपेण वदाम्यहम् ।
गोचरं शिवचिह्नं हि गोत्रं स्वमुनिवर्गकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रमाचारमेवं हि शैवानामुच्यते क्रमात् ।
शिवः शिखा तथा ज्योतिः सावित्रीचेति गोचराः ॥
एतच्चतुर्थनामानि शैवानां शिवशासने ।
गोचरमि . . तच्चिह्नं च चतुर्विधम् ॥
काश्यपः कौशिकश्चैव भारद्वाजोऽथ गौतमः ।
एते चतुर्विधा ज्ञेयाः संप्रोक्ता मुनयास्त्विह ॥
व्रतं हि द्विविधं प्रोक्तं सामान्यं च विशेषतः ।
ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ॥
~~प~~ चतुराश्रम एवं हि सामान्यविधिचोदितम् ।
चतुर्णां गोचराणां तु सममेतद्धि वागममिति ॥

कालोत्तरे च -

शिवः शिखा तथा ज्योतिः सावित्रीति चतुष्टयम् ।
शैवं कुलं शिवाज्जातं शक्तेर्जातं शिखाकु . . ॥
बिन्दोर्ज्योतिष्कुलं जातं नादात् सावित्रमेव च ।
दीक्षाकाले यदा मन्त्रो लीयते च शिवादिषु ॥
तत्तद्द्वारवशाज्जातं क्रमात् कुलचतुष्टयम् ।
क्रमादेतं तु विज्ञेयं ब्राह्मणादिचतुष्टये ॥
शुद्धजात्युदये नश्येत् प्राकृतं यत् कुलं स्थितम् ।

कृतयुगे ब्राह्मणसन्यासी श्रेष्ठः । त्रेतायुगे क्षात्त्रिय -

In Public domain. Digitization Muthulakshmi Research Academy

सन्यासी च श्रेष्ठः। द्वापरयुगे वैश्यसन्यासी श्रेष्ठः। कलियुगे शूद्रसन्यासी श्रेष्ठः॥ इत्यादिकं ब्रह्माण्डपुराणादिके विद्यमानं द्रष्टव्यम्।

सर्वज्ञानोत्तरे -

द्वावेवाश्रमिणौ द्वौ वै गृहस्थब्रह्मचारिणौ।
लोकानुग्रहकर्तारौ परिव्राट् तापसौ न हि॥

कालोत्तरे -

वानप्रस्थयतीनां तु गुरुत्वं नेष्यते सदा।

सुप्रभेदे -

भावद्रव्याग्निसन्त्यागाद्येते सन्यासिनो यदा।
दीक्षास्थापनयोस्तस्मादेते नैवाधिकारिण

इत्यादि निषेधवचनात् कथं कथयन्ति सन्यासिनां गुरुत्वमिति चेत्। सत्यम्। आणवी नाम क्रिया दीक्षां विना शाक्ती शाम्भवीति दीक्षा द्विविधा। तस्यां ज्ञानवतीदीक्षायां कथञ्चित् क्वाचित्कं गुरुत्वमस्त्येव। तदुक्तं सन्यासदीपिकायां -

परहंसयतीनां च तपःसन्यासिनां च यौ।
अनयोरग्निकार्येषु योग्यत्वं न विधीयते॥
होमं विना तयोरेवमभिषेकं विधीयते।

इति शैवसन्यासविधिः समाप्तः॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवपूजाधिकारविधिः ॥

शैरवे -

श्वेतवर्णं भवेद्विप्रे क्षत्रिये रक्तवर्णकम् ।
पीतवर्णं भवेद्वैश्ये कृष्णवर्णं तुरीयके ॥

ज्ञानसारे -

श्वेतं रक्तं तथा पीतं कृष्णवर्णं चतुर्विधम् ।
भूसुरादिचतुर्णां तु वर्णानां लिङ्गकं क्रमात् ॥
अथवा कृष्णवर्णं तत् सर्वजात्यर्हकं भवेत् ।

कालोत्तरे -

अभावात् कृष्णवर्णं तु सर्वजातिषु सिद्धिदम् ।

तत्रैव -

सर्वार्थसिद्धिदं कृष्णं चतुर्वर्णहितावहम् ।
सर्वेषामथवा श्वेतबाणलिङ्गं विमुक्तिदम् ॥

सूक्ष्मे -

ब्राह्मणस्य तु वस्वश्रं क्षत्रियस्य षडश्रकम् ।
वैश्यस्य चतुरश्रं स्यात् शूद्रस्यैव तु वृत्तकम् ॥
सर्वजातिषु कर्तव्यं पीठं वृत्तं विचक्षणः ।

In Public domain. Digitization Muthulakshmi Research Academy

विद्यासारसंहितायां -

२. लिङ्गं ब्राह्मणानां सर्वाभीष्टप्रदं भवेत् ।
रत्नलिङ्गं क्षत्त्रियाणां महाराज्यप्रदं भवेत् ॥
स्वर्णलिङ्गं तु वैश्यानां महाधनपतिप्रदम् ।
शिलालिङ्गं तु शूद्राणां महदैश्वर्यदं विदुः ॥
स्फटिकं बाणलिङ्गं च सर्वेषां सर्वकामदम् ।
स्त्रीणां तु पार्थिवं लिङ्गं सभर्तॄणां विशेषतः ॥
विधवानां निवृत्तानां रसलिङ्गाद्यनुक्रमम् ।
बाल्ये वा यौवने वाथ वार्धके वाथ सुव्रताः ॥
शुद्धस्फटिकलिङ्गं तु स्त्रीणां वै सद्यभोगदम् ।

अंशुमति -

विप्रक्षत्त्रियवैश्याश्च शूद्राश्चैव तु दीक्षिताः ॥
आत्मार्थमर्चनं कुर्युर्न कुर्युस्तु परार्थकम् ।
चातुर्वर्णोद्भवस्त्रीणामर्चनं च विशेषत इति
शिवपूजाधिकारविधिः समाप्तः ॥

शिवादिनिन्दादोषप्रतिपादकं वचनं सुप्रभेदे

ज्ञानपादे -

देवद्रव्यापहारश्च शिवशास्त्रविदूषकः ।

In Public domain. Digitization Muthulakshmi Research Academy

पितृघातश्च ब्रह्मघ्ना शवमाद्यस्त्वनेकशः ।
यातनास्थानमाश्रित्य पतन्ति नरकार्णवे ॥

उपदेशकाण्डे-

शनाः षडपि शम्भ्वादीन् शिवस्थानान्यपि द्विजाः ।
160 b. वेदान् विभूतिरुद्राक्षमागमानपि शङ्करान् ॥
तथा शिवपुराणानि शिवशाम्बरकान् परान् ।
विनिन्दयति मूढात्मा शिवद्रोही स ईरितः ॥
विनिन्दकस्य निकटे वर्तनं श्रवणं तथा ।
वीक्षणं स्पर्शनं तस्य तेन सम्भाषणं तथा ॥
तद्वाक्यश्रवणं तद्वत् शिवद्रोहः स ईरितः ।

ब्रह्माण्डादिसकलपुराणसारे विरूपाक्षमाहात्म्ये पूर्वभागे ॥

शिवशास्त्रं शिवाचारं शिवमन्त्रं शिवोत्सवम् ।
शिवलोकं शिवज्ञानं शिवध्यानं शिवार्चनम् ॥
शिवशक्तिं शिवस्तोत्रं शिवक्षेत्रं शिवागमम् ।
लघु कुर्वन्ति ये पापास्तान्निबोडनानिशम् ॥
शैवं पाशुपतं कालामुखं कापालधारिणम् ।
यदि हन्याज्जगत्पूर्वं हतं तेन दुरात्मना ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्राग्जात्युदीरणाद्देवि प्रायश्चित्तीतरो भवत् ।
दिनत्रयं तु रुद्रस्य पञ्चाहं केशवस्य तु ॥
पितामहस्य पक्षैकं नरके पच्यते तु सः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च परमेश्वरी ॥
आश्रमत्वे युक्ताश्च ते सर्वे शिवा स्थिताः ।
अन्यथा प्राकस्वरूपेण ये पश्यन्ति नराधमाः ॥
नरके ते प्रपच्यन्ते सादाख्यं वत्सरत्रयम् ।

काशीखण्डे-

शिवनिन्दारतो मूढः शिवशास्त्रविनिन्दकः ।
तस्य नो निष्कृतिं दृष्टा क्वचित् शास्त्रेष्वपि केनचित् ॥

सूतसंहितायां च -

अस्ति चेद्ब्रह्मविज्ञानं स्त्रियो वा पुरुषस्य वा ।
वर्णाश्रमसमाचारास्तस्य नास्त्येव सर्वदा ॥
न विज्ञायात्मविज्ञानं सवर्णाश्रममास्तिकाः ।
जहाति यः स मूढात्मा स । इति ।

मनुस्मृतौ -

त्रिपुण्ड्रं भस्मना धार्यं नित्यमेव द्विजादिभिः ।
यानि सः ।
दत्तं यथा फलमिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

स्कान्दे काशीखण्डे विष्णुं प्रति शिववचनम् :

ममाश्रमरतांश्चान्ये ये निन्दन्ति नराधमाः ।
ब्राह्मणादिचतुर्वर्णान् शिवास्त्रकवचान्वितान् ॥
पाषण्डास्ते सुरश्रेष्ठ भविष्यन्ति न संशयः ।
तेषां तप्तं हुतं जप्तं स्नानं ध्यानादि पूजनम् ॥
भस्मनीव हुतं हव्यं सर्वं भवति निष्फलम् ।
ममाश्रमरता द्वेष्टि यः समा द्वेष्टि माधवम् ॥
ममाश्रमरतांस्तौति यः स मां स्तौति निर्मलम् ।
. चान्यथा करिष्यन्ति एवं मायामूढ . . ॥
ब्रह्मेन्द्रार्कादि देवताः ।
समर्थाः स्युः परित्राणे पातुकान्नरकार्णवे ॥

स्वच्छन्दे -

ब्राह्मणा क्षत्रिया वैश्याः शूद्राश्चान्येऽथवा प्रिये ।
सर्वे ते समधर्माणः शिवधामनि योजिताः ॥
सर्वे जटाधराः प्रोक्ता भस्मोद्धूलितविग्रहाः ।
एकपङ्क्तिभुजः सर्वे वन्तु वरानने ॥
मन्त्रमेतत् समाहृत्य प्राग्जातिं न ह्युदीरयेत् ।
पुत्रकाणां साधकानां तथा समयिनामपि ॥

In Public domain. Digitization Muthulakshmi Research Academy

वृद्धाचलमाहात्म्ये च -

स्नाने वा जपहोम ... तिथौ देवार्चना तयो -

दीक्षा श्राद्धकयोः कृतौ स भवितो -

रुद्राक्षमालाधरः ।

आयुः कर्म च वैदिकं च सकलस्योदक्षयन् तत्फलं

नो चेद्व्यर्थमिदं भवत्ययमहो पापोऽनवद्यो भवेदिति ॥

अंशुमति -

त्रिपुण्ड्रेण विना श्राद्धं त्रिपुण्ड्रेण विनाहुतिः ।

त्रिपुण्ड्रेण विना दानं राक्षसं तत्प्रकीर्तितमिति ॥

अतः शिवागमप्रोक्तविशेषाचारतत्पराः ।

नराः श्रेयांसि भूयांसि विन्दन्तीति निश्चितम् ॥

इति शालिवाटिपुरनिवासि -

ज्ञानप्रकाशगुरुविरचित शिवागमादि -

माहात्म्यसङ्ग्रहः समाप्तः ॥

श्रीमद्देवशिखामणिगुरुभ्यो नमः ।

श्रीमत्षण्मुखगुरवे नमः ॥

In Public domain. Digitization Muthulakshmi Research Academy